સમર્પિત નિર્ણતાતે આ: પત્રુષ્ણ સનાતન:।
જાય તાઝ્ઞાન મીના ચો વેદ વેદ્યો મહાનતિ:।।
ankurnagpal108@gmail.com

नमो भगवते श्रीरामाय

अथ भगवद्रामानन्दाचार्यप्रणीतानन्दभाष्योपेता

प्रश्नोपनिषत्

ॐ सुकेशा च भारद्वाजः, शैब्यश्च सत्यकामः, सौर्यायणी च गार्ग्यः । कौशल्यश्चाश्वलायनो भार्गवो वैदर्भिः कबन्धी कात्यायनः । ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः

अब्धिः सुधानिधिस्तेजोनिधिर्मर्यादितक्रियः ।
यतस्तं प्रणुमो रामं मर्यादापुरुषोत्तमम् ॥१॥

आराध्यं ब्रह्मरुद्रादेर्जगद्धेतुं च मुक्तिदम् ।
दिव्यदेहं गुणाम्भोधिं रामं ब्रह्म समाश्रये ॥२॥

सूत्रवृत्तिकृतौ नत्वा व्यासबोधायनौ मुनी ।
श्रीमन्तं राघवानन्दाचार्यं गुरुं नमाम्यहम् ॥३॥

कुर्वे गुरुं नमस्कृत्य ज्ञानभक्तिदयानिधिम् ।
प्रश्नोपनिषदो रम्यं भाष्यमानन्दसंज्ञकम् ॥४॥

सारल्येन विद्याधिगमायाख्यायिकामुपक्रमते । सुकेशा च भारद्वाज इति नामतः सुकेशा इति प्रसिद्धः, भरद्वाजस्यापत्यं पुमान् भारद्वाजः, भरद्वाजपुत्र इत्यर्थः । शिबेरपत्यं पुमान् शैब्यः, स नाम्ना सत्यकाम इति श्रुतः । सौर्यायणी च गार्ग्यः, गर्गस्य गोत्रापत्यं गार्ग्यः सूर्यायणस्यापत्यं सौर्यायणिः स एव सौर्यायणी नामतो यः कश्चिद् ऋषिः । ईकारश्चात्र छान्दसः ।

Scanned by CamScanner

परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः ॥१॥

तान् ह स ऋषिरुवाच । भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ। यथाकामं प्रश्नान् पृच्छत । यदि

कौशल्यश्चाश्वलायनः, नाम्ना कौशल्यः, अश्वलायनस्य मुनेरपत्यम् । विदर्भस्यापत्यं वैदर्भिर्भृगोर्गोत्रापत्यम् । नामतः कबन्धीति विदितः कात्यायनगोत्रोत्पन्नः । ह प्रसिद्धाः । त एते पूर्वोक्ताः षट्संख्याका ऋषयः । ब्रह्मपरा ब्रह्म वेदः परः प्रधानमध्ययनकर्मभूतं येषां ते तादृशा वेदाध्ययनपूर्वकवेदार्थविचारपरायणाः । ब्रह्मनिष्ठा ब्रह्मणि तपसि निष्ठा येषां ते तादृशाः तपःपरायणाः, तपो ब्रह्मेतिस्मरणात् । परं ब्रह्म परमपुरुषम् । अन्वेषमाणा जिज्ञासमानाः, ब्रह्मणि परत्वन्तु गुणतः स्वरूपतश्च निरतिशयबृहत्त्वरूपमुत्कृष्टत्वस्वरूपम् । स्वरूपेण गुणैश्च सर्वातिशायिबृहत्वशालिपुरुषविचारणावन्त इत्यर्थः । एषोऽस्मद्बुद्धिस्थः परब्रह्मवित्तयाप्रसिद्धः पिप्पलाद एव, हपदस्य प्रसिद्धार्थत्वाद् वैशब्दस्य निर्धारणार्थकत्वाच्च । तत्सर्वं वक्ष्यति योऽर्थोऽस्माभिः प्रष्टव्योऽस्ति तं तं सर्वमर्थं बोधयिष्यत्यस्मानितिनिश्चयवन्तः । समित्पाणयः समिधः पाणौ सन्ति येषां ते तादृशाः । रिक्तपाणिर्नगच्छेत्तु राजानं श्रोत्रियं गुरुमिति स्मृतेः, समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमितिश्रुत्यनुसाराच्च स्वस्वकरे कृतसमिधो भगवन्तं परब्रह्मवित्तया प्रसिद्धं पूज्यं पिप्पलादमेतन्नामकमृषिप्रवरमुपसन्नाः प्राप्ताः तदीयशरणं गता इत्यर्थः ॥१॥

तान् सुकेशाप्रभृतीन् षडपि मुनीन् ह प्रसिद्धः स ऋषिः पिप्पलाद उवाच । पूर्वं भवद्भिस्तपः समाचरितं भवेदेव यतो ब्रह्मजिज्ञासयाऽत्र समागतास्तथापि ब्रह्मविद्याग्रहणनियमानुरोधेनैकं संवत्सरमत्र संवत्स्यथ । गुरुकुले वासस्य नियमान्तर्गतत्वादितिभावः । स च वासः केन रूपेणेतिदर्शयति—तपसा शरीरधारणमात्रौपयिकाहारनिषेवणसहितशरीरपरिशोषणरूपमिह तपस्तेन तपसा युक्ताः सन्त इत्यर्थः । ब्रह्मचर्येण स्मरणं

विज्ञास्यामः सर्वं ह वो वक्ष्याम इति ॥२॥

अथ कबन्धी कात्यायन उपेत्य पप्रच्छ । भगवन् कुतो ह वा इमाः प्रजाः प्रजायन्त इति ॥३॥

तस्मै स होवाच । प्रजाकामो ह वै प्रजापतिः । स तपोऽतप्यत । स तपस्तप्त्वा मिथुनमुत्पादयते रयिञ्च प्राणं

कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् । सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेवचेत्युक्ताष्टविधमैथुनत्यागरूपं ब्रह्मचर्यं तेन युक्ताः सन्तः । तथा—श्रद्धया श्रद्धा तु आस्तिक्यबुद्धिर्गुरुवाक्ये विश्वासो वा तया युक्ताः सन्तो गुरुगृहे वसत तदनन्तरं यथाकामं स्वेच्छानुसारं प्रश्नान् पृच्छत स्वाभिलषितपदार्थविषयान् प्रश्नान् कुरुत, यदि प्रश्नं वयं विज्ञास्यामस्तर्हि सर्वं भवद्भिः पृष्टं वस्तु वो युष्मान् वक्ष्यामो बोधयिष्यामः तत्र वञ्चनां नाचरिष्यामः । यदि संवत्सरपर्यन्तं तपोब्रह्मचर्यश्रद्धासमन्विततयाऽतिक्लेशसाध्यो वासो नाभिप्रेतो भवेत् तदा सुखेन गन्तव्यं नास्माकमत्यादर इति भावः । गुरुशुश्रूषया विद्येत्युक्तेः शुश्रूषाकरणं भवतामावश्यकमिति व्यज्यते । यदि विज्ञास्याम इत्यनेन गुरुः स्वस्यामानित्वं प्रकटयति श्रद्धापरिक्षार्थञ्चैतदुक्तमितिभावः ॥२॥

अथ तप आदिना सम्वतसरपर्यन्तं गुरुकुले वासानन्तरं कात्यायनगोत्रो नाम्ना कबन्धी ऋषिरुपेत्य पिपल्लादं गुरुं समुपागत्य पप्रच्छ पृष्टवान् । किं पृष्टवानित्यत्राह—हे भगवन् पूज्यगुरो कुतः कस्मात् कारणभूताद् इमा दृश्यमाना प्रजा मनुष्यपश्वादयः प्रजायन्ते समुत्पद्यन्त इति ॥३॥

स गुरुः पिप्पलादस्तस्मै कबन्धिने शिष्याय वक्ष्यमाणमुवाच प्रोक्तवान् । प्रजाकामः प्रजाः स्रष्टुमिच्छुः सन् प्रजापतिः परमात्मा श्रीरामः स प्रसिद्धो वै निश्चयेन तप अतप्यत, यस्य ज्ञानमयं तप इति श्रुत्यनुसारेण तपोऽत्र ज्ञानम् । तच्च संकल्पात्मकं स्रष्टव्यवस्तुविषयकं पूर्वमिदं स्रक्ष्यामि तत इदमित्येवात्मकमालोचनं कृतवानित्यर्थः । स प्रजापतिः परमात्मा तपस्तप्त्वा इदमित्थं स्रष्टव्यमिति स्रष्टव्यं पर्यालोच्य मिथुनं भोग्यभोक्तृत्व-

चेत्येतौ मे बहुधा प्रजाः करिष्यत इति ॥४॥

आदित्यो ह वै प्राणो रयिरेव चन्द्रमाः, रयिर्वा एतत्सर्वं यन्मूर्त्तं चामूर्त्तञ्च तस्मान्मूर्त्तिरेव रयिः ॥५॥

अथादित्य उदयन् यत् प्राचीं दिशं प्रविशति तेन

रूपं युगलं प्रकृतिपुरुषात्मकमित्येतत्। उत्पादयते सृष्टवानित्यर्थः। किं तद् मिथुनमित्यत्राह–रयिञ्च प्राणञ्चेति। रयिः प्रकृतिः प्राणश्च पुरुषस्तदेतद्युगलरूपं मिथुनमित्यर्थः। एकं मिथुनमात्रं कथमुत्पादितवान् नान्यदित्यत्राह–एतौ रयिप्राणौ मे प्रजाकामस्य मम कृते बहुधा बहुप्रकाराः प्रजाः प्राणिनः करिष्यत उत्पादयिष्यतः किमन्यसृष्टया मत्कृतयेतीच्छया मिथुनमात्रमुत्पादितवानिति भावः ॥४॥

पूर्वमुक्तयो रयिप्राणशब्दयोरर्थं स्वयमाह श्रुतिः–आदित्यो ह वै प्राण– आदत्ते गृह्णाति भोगार्थं भोग्यवर्गं यः स आदित्यो भोक्ता पुरुषः स एव प्राणः प्राणरूपतया प्रसिद्धः। हवैशब्दयोः क्रमेण प्रसिद्ध्यवधारणाद्योतकत्वात्। भोक्तृवर्गस्य प्राणशब्देन निर्देशे हेतुमग्रिमेण मन्त्रेण स्वयं वक्ष्यति श्रुतिः। रयिर्भोग्यवर्गः प्रकृतिरित्येतदेव चन्द्रमा भोक्तुरादित्यशब्देन कथनात् तत्प्रतिद्वन्द्विनो भोग्यजातस्यादित्यप्रतिद्वन्द्विचन्द्रशब्देन निर्देशः कृतः। सम्प्रति रयिशब्दार्थं विवृणोतिश्रुतिर्मूर्तिरेव रयिरिति। मूर्तिः पाञ्चभौतिकं सर्वं शरीरमेव रयिर्भोग्यमित्यर्थः। मूर्त्तिरेव रयिरितिकथमित्यत्र तदुपपादयितुमाह रयिर्वा एतत्सर्वम्। यन्मूर्त्तं स्थूलं भूतत्रयं पृथिव्यप्तेजोलक्षणम्। यच्चामूर्त्तं सूक्ष्मं वाय्वाकाशलक्षणं भूतद्वयम्। एतत्सर्वमपि भूतजातं तन्निर्मितशरीरादिकञ्च रयिरन्नं भोग्यमित्यर्थः। यद्यपि रयिशब्दो धनरूपार्थे प्रसिद्धस्तथापि धनस्यापि भोग्यत्वाद् भोग्यत्वसामान्यात् सर्वमेव भोग्यजातं रयिशब्देन निर्दिष्टमतश्चन्द्रमसोऽपि रयिशब्देन निर्देशो युक्त एव चन्द्रमःशरीरस्यापि भोग्यत्वाद्। अन्नादिसर्वभोग्यपरिपोषकत्वाच्चेति भावः ॥५॥

आदित्यशब्देन भोक्तृवर्ग उपक्रान्तः स एव प्राणशब्देनाप्युक्तः। अधुना भोक्तृवर्ग आदित्यशब्देन प्राणशब्देन च कथमुक्त इतिशङ्कां समाधातुं भोक्तु-

प्राच्यान् प्राणान् रश्मिषु सन्निधत्ते । यद्दक्षिणां यत्प्रतीचीं यदुदीचीं यदधो यदूर्ध्वं यदन्तरा दिशो यत्सर्वं प्रकाशयति तेन सर्वान् प्राणान् रश्मिषु सन्निधत्ते ॥६॥

रादित्यस्य च समानकार्यकारित्वेन सादृश्यादादित्यशब्देन व्यपदेशः, तच्च समानं कार्यं प्राणपरिपोषकत्वमेवात एव प्राणशब्देन व्यपदेशोऽपि प्राण-परिपोषके प्राणशब्दव्यपदेशस्य युक्तत्वात् । अथ चन्द्रमसि रयित्वनिरूपणान-न्तरम् । आदित्य आदित्यशब्दोदितो भोक्ता निरूप्यत इति शेषः । आदि-त्यभोक्त्रोः सादृश्यं भोक्तुरादित्यशब्देन कथने निमित्तम्, तयोः प्राणत्वेन व्यपदेशनिमित्तञ्च वर्ण्यत इत्यर्थः । आदित्यः सूर्य उदयन् उदयं गच्छन् प्राणि-नां चाक्षुषप्रत्यक्षविषयतां प्राप्नुवन्नित्येतत् । प्राचीं दिशं यत् प्रविशति स्व-प्रकाशेन प्राचीं दिशं व्याप्नोति तेन स्वप्रभया प्राच्या दिशो कम्पनेन प्राच्यान् प्राणान् प्राग्दिगन्तर्गतप्राणिनां प्राणान् रश्मिषु सन्निधत्ते स्वरश्मिभिः प्राणान् पुष्णाति, आदित्योदयाभावे प्राणनमेव न स्यात् प्राणिनामतः प्राणपरिपो-षकत्वमादित्यस्येतिभावः । तथा स आदित्य उदयमानः दक्षिणां दिशं यत् प्रविशति, प्रतीचीं दिशं यत् प्रविशति, उदीचीं दिशं यत् प्रविशति, यदधो-गतां दिशं प्रविशति यच्चोर्ध्वगतां दिशं प्रविशति, यदन्तराः कोणगता ईशानवायव्याद्याः दिशः प्रविशति, अन्यच्च यत् सर्वं प्रकाशयति स्वप्रभया व्याप्नोति तेन स्वप्रभया प्रकाशनेन तत्तद्दिग्गतान् प्राणान् प्राणि-षु वर्त्तमानान् रश्मिषु सन्निधत्ते परिपुष्णाति तथैवादित्यशब्दितो भोक्तृ-वर्गोऽप्युदयन् सृष्टिकाले उदयमापन्नः सुषुप्तिस्थानादुदितो वा प्राच्या-दिकाः सर्वाः पूर्वोक्ता दिशः प्रकाशयति, तत्तद्दिग्गतान् प्राणान् चक्षुरा-दीन्द्रियरूपान् रश्मिषु सन्निधत्ते धर्मभूतज्ञानरूपस्वरश्मिद्वाराऽधितिष्ठति प्रेरयतीत्येतत् । जीवाधिष्ठानं विना चक्षुरादिप्राणानां विषयाप्रकाशकत्वा-दतश्च प्राणपरिपोषकत्वमादित्यस्येव भोक्तुरपि, तस्मात् प्राणशब्देन भोक्तुर्व्यपदेश इतिभावः । अनेन आदित्यशब्देन व्यपदेशे हेतुः प्राच्यादिदि-क्प्रकाशकत्वरूपं सादृश्यमित्युक्तं प्राणशब्दव्यपदेशहेतुश्च प्राणपरिपोषकत्व-रूपसादृश्यमुक्तमिति ध्येयम् ॥ ६ ॥

स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते । तदेतदृचाऽभ्युक्तम् ॥७॥

विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम् ।

स एष "प्रजाकामो ह वै प्रजापति" रित्यत्र प्रजापतिशब्देन निर्दिष्टः परमात्मा श्रीराम एष वैश्वानरो जाठराग्निरूपेणावस्थितोऽत एवास्य एष इति निर्देशः, वैश्वानरस्यानुभवगम्यत्वात् । विश्वं रूपं शरीरं यस्य स विश्वरूपः सर्वशरीरकोऽग्निरन्ननयनहेतुर्जीवस्येत्यर्थः । प्राणो भोक्तृरूपः सन्नादित्यरूपः सन् वोदयत उदयं प्राप्नोति । एतेन भोक्तुरादित्यस्य च परमात्मात्मकत्वमुक्तं भवति । तदेतत् प्रजापतिशब्दोदितं परमात्मस्वरूपम् । ऋचा वक्ष्यमाणयाऽभ्युक्तं कथितम् ॥७॥

यया ऋचाऽभ्युक्तं परमात्मस्वरूपं तामृचमेव दर्शयति—विश्वरूपमित्यादि । विश्वरूपं सकलचिदचिच्छरीरकम् । हरिणं हरिं परमात्मानम् । हरिशब्दस्य छान्दसं नकारान्तत्वम् । जातवेदसं जातानि वेदांसि ज्ञानानि यस्मात् स जातवेदास्तं सकलज्ञानकारणम् । परायणं परमुत्कृष्टमयनं गतिम् । सर्वोत्कृष्टप्राप्यस्वरूपमित्यर्थः । ज्योतिः "तद्देवानां ज्योतिषां ज्योति" रित्यनुसारेण प्रकाशकानामपि सूर्यादीनां प्रकाशकम् । एकं स्वसमाऽभ्यधिकद्वितीयरहितम् । तपन्तम् अग्न्यादित्यादिरूपेण प्रकाशमानम् । एवम्भूतं परमात्मानम् वर्तमानोऽनुवर्तमानस्तच्छेषतां गत इत्यर्थः । सहस्ररश्मिः सहस्रं नानाविषयविषया रश्मयो धर्मभूतज्ञानरूपा यस्य तादृशनानाविषयकज्ञानविशिष्टः । प्रजानां स्थावरजङ्गमरूपाणाम् । प्राणः प्राणपरिपोषकत्वात् प्राणो धर्मभूतज्ञानद्वारेन्द्रियप्रवर्तक इत्यर्थः । सूर्य आदित्यशब्दितो भोक्ता शतधा सुरनरादिबहुविधदेहाभिमानितया—उदयते सर्गसमय उदयं गच्छति यद्वा सुषुप्त्यनन्तरं जागर्ति । आदित्यपक्षे तु सहस्ररश्मिः सहस्रकिरणः । शतधा प्राणिभेदेन बहुप्रकारेण वर्तमानः प्राणः सर्वप्राणिप्राणपरिपोषकतया प्राणरूप एष सूर्य आदित्यः प्रत्यहमुदयत इत्यर्थः । अन्यत्तु समानमेव । अनेनापि भोक्तुरादित्यशब्दव्यपदेशो

Scanned by CamScanner

न्तम् । सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ॥८॥

संवत्सरो वै प्रजापतिस्तस्यायने दक्षिणं चोत्तरं च । तद्येह वै तदिष्टापूर्ते कृतमित्युपासते ते चन्द्रमसमेव लोक-

सादृश्यरूपं निमित्तमुक्तमिति ध्येयम् । आदित्यस्यापि परमात्मानुवर्त्तित्वात् । सहस्ररश्मित्वादिवत्त्वाच्चेति ध्येयम् ॥८॥

पूर्वम् "एतौ मे बहुधा प्रजाः करिष्यतः" इत्याशयेन रयिप्राणशब्दितं मिथुनमुत्पादितवान् प्रजापतिरित्युक्तम् । अनेन मिथुनेन बहुधा प्रजासृष्टिः कथमभूदिति शंकायां रयिप्राणशब्दोक्तचन्द्रादित्याभ्यामेवाहोरात्रकृष्णशुक्लपक्षदक्षिणोत्तररूपायनस्वरूपकालविभागद्वाराऽन्नरेतःक्रमेण प्रजासृष्टिरभूदिति दर्शयितुं प्रथममयनविभागं प्रस्तौति संवत्सर इति । संवत्सरस्य प्रजापतित्वं प्रजासृष्टिद्वारभूतत्वादौपचारिकं बोध्यम् । संवत्सरः संवत्सराख्यः कालविशेषः स एव प्रजापतिस्तस्य द्वे अयने आदित्यचन्द्रमसोर्गत्याधारभूते स्वरूपे विद्येते इत्यर्थः । तयोर्नामजिज्ञासायामाह दक्षिणं चोत्तरं च दक्षिणायनमुत्तरायणञ्चेति संवत्सरस्य रूपद्वयमित्यर्थः । ज्येष्ठमासादारभ्य कार्तिकमासपर्यन्तं वत्सरप्रजापतेः स्वरूपं दक्षिणायनशब्दवाच्यम् । मार्गशीर्षमासादारभ्य वैशाखमासपर्यन्तस्वरूपमुत्तरायणशब्दवाच्यमितिभावः । तत्र दक्षिणायने रयित्वमुपपादयितुमाह—तद्ये ह वै । "ह वै" इति निपातद्वयं प्रसिद्धत्वं द्योतयति वक्ष्यमाणार्थस्य । तत् तयोर्मध्ये दक्षिणायनोत्तरायणमध्य इत्यर्थः । अस्य दक्षिणं प्रतिपद्यन्त इत्युत्तरेणान्वयः । ये ब्राह्मणादय इष्टापूर्ते इष्टञ्च पूर्तञ्चेष्टापूर्ते इष्टमग्निहोत्रादिकं कर्म, पूर्तं वापीकूपादि कर्म । अग्निहोत्रं तपः सत्यं वेदानाञ्चानुपालनम् । आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते ॥ वापीकूपतडागादिदेवतायतनानि च । अन्नप्रदानमारामः पूर्तमित्यभिधीयते ॥ इति मनूक्तेः ॥ इतिशब्द आदिवाची तथा च इष्टापूर्तादिकं कर्म यत् कृतमनित्यमस्ति तदुपासते । द्वितीयतच्छब्दस्य कर्मविशेषणत्वात् । अनुतिष्ठन्ति ते कर्मानुष्ठातारश्चान्द्रमसं चन्द्रमसोऽयं

**मभिजयन्ते । त एव पुनरावर्तन्ते ॥ तस्मादेत ऋषयः प्रजा-
कामा दक्षिणं प्रतिपद्यन्ते एष वै रयिर्यः पितृयाणः ॥९॥**

**अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मान-
मन्विष्याऽऽदित्यमभिजयन्ते ॥ एतद्वै प्राणानामायतन-**

चान्द्रमसस्तं चन्द्रसम्बन्धिनमेव लोकं चन्द्रलोकमेवेत्यसूर्यलोकमितिभावः अभिजयन्ते लभन्ते, त एवानित्यकर्मपरायणा एव पुनरावर्त्तन्ते चन्द्रलोकाद् भूर्लोकं ततो हीनतरं वा लोकं प्राप्नुवन्ति । दक्षिणमार्गेण कर्ममात्रानुष्ठायिनश्चन्द्रलोकं यान्ति । तत्र भोगेन पुण्यक्षये जाते सति पुनरस्मिन्नेव भूर्लोकेऽतोऽपि हीने वा लोके समायान्तीतिभावः । तस्माद् हेतोरेके कर्मानुष्ठातार ऋषयः क्षुद्रफलमात्रदर्शकाः । अत एव प्रजाकामाः प्रजाप्रभृतिक्षुद्रफलानि कामयमाना दक्षिणं दक्षिणायनमार्गं प्रतिपद्यन्ते प्राप्नुवन्ति । एष एव पितृयाणः पितृलोकगमनाय पितृयाणशब्देन प्रसिद्धो दक्षिणायनमार्ग एव रयिः । रयित्वेन रूपितस्य चन्द्रस्य प्रापकत्वाद् भोगप्रधानत्वाच्च रयिर्विषयभोगप्रधानोऽन्नमित्युच्यत इत्यर्थः ॥ ९ ॥

अथ शब्दो मार्गान्तरस्य प्रक्रमं सूचयति । दक्षिणायनापेक्षयाऽपरो मार्गः प्रतिपाद्यतेऽधुनेत्यर्थः । उत्तरेणायनेन गमनशीला आदित्यमभिजयन्त इत्यन्वयः । ये उपासका जनाः प्रजापशुस्वर्गादिक्षुद्रफलविरक्तास्तपसा कायक्लेशसाधनचान्द्रायणादिना । ब्रह्मचर्येणाष्टविधमैथुनत्यागात्मकेन, श्रद्धया आस्तिक्यबुद्धिरूपया विद्यया प्रत्यगात्मविषयकज्ञानलक्षणया । आत्मानं परमात्मस्वरूपम् । अन्विष्य श्रवणमनननिदिध्यासनैर्विज्ञाय साक्षात्कृत्येत्येतत् । उत्तरेणायनेनार्चिरादिना देवयानेन यथा । आदित्यं प्रापयितारं परमाप्तिद्वारभूतम् । अभिजयन्ते प्राप्नुवन्ति । अर्चिरादिमार्गश्च स्पष्टतया प्रतिपादितः श्रीरामप्राप्तिपद्धतौ श्रीरामेश्वरानन्दाचार्यैः । तद् यथा—"दिनं तत्रार्चिषोऽह्नश्च शुक्लपक्षं च गच्छति । समेति शुक्लपक्षात्स उत्तरायणमेव हि ॥१॥ तस्मात्संवत्सरं तस्माद् वायुं वायोश्च भास्करम् । सूर्याद्विधुं विधोश्चाथ विद्युतं

मैतदमृतमभयमेतत् परायणमेतस्मान्न पुनरावर्त्तन्त इत्येष निरोधस्तदेषश्लोकः ॥१०॥

वरुणं ततः ॥२॥ ततश्चेन्द्रं ततो धातृलोकं गच्छत्युपासकः । अतिक्रामति पश्चाद् भूम्याद्यावरणसप्तकम् ॥३॥ उल्लंघ्य प्रकृतिं सोऽथ विरजामवगाहते । ततः सूक्ष्माच्छरीराद्धि विश्लिष्टश्च भवत्यसौ ॥४॥" एतद्वै प्राणानामायतनम् । एतदिति नपुंसकत्वमायतनशब्दविशेषणतया । एतत् परमात्मस्वरूपम् । प्राणानाम् प्राणवतां जीवानामायतनमाधारभूतम् । सर्व आत्मानः तत्र समर्पिता इत्यादिश्रुतिभ्यः सर्वजीवाधारतायाः परमात्मनि समवगमात् । एतत् परमात्मस्वरूपं परब्रह्म अमृतं निरुपाधिकामृतत्वयोगि । अभयं सर्वविधभयविवर्जितम् । एतत् परायणं परमं प्राप्यम् । एतत् परब्रह्म व्याप्यैतस्माद् विष्णोः परमपदात् पुनर्नावर्तन्ते संसारगर्त्ते न पतन्ति उपासका इत्यर्थः । यद्वा 'एतद्वै' इत्यादि आदित्यमत्तारं प्राणमुपैति—एतदादित्यस्वरूपं प्राणानां प्राणभृत् प्राणानामायतनम् "प्राणान् रश्मिषु सन्निधत्त" इत्युक्तप्रकारेण आदित्यस्य प्राणाधारत्वावगमात् । अमृतस्य प्राप्तिद्वारत्वादेतदमृतमित्युच्यते । आदित्यं गत्वा ब्रह्म प्राप्नुवन्त्युपासकास्ततश्च न संसारभयमस्य भवत्यभियसाधनत्वादभयमेतत् । एतत् परमुत्कृष्टमयनं गतिर्गतिसाधनमिति परायणमपि । एतस्मादादित्यान्न पुनरावर्त्तन्ते । आदित्यं प्राप्य आदित्याच्चन्द्रमसं ततो विद्युतमित्यादिक्रमेण विष्णुपदं साकेतं प्राप्नोतीत्यतो नावृत्तिः संसारे भवतीत्यर्थः कार्यः । इत्यस्मात् "यतो नावर्तन्ते" इति कारणात्-एष परमात्मा निरोधः पुनः संसारागमनप्रतिबन्धकः । यद्वा एष आदित्यः सर्वप्राप्तानामधोगतिनिरोधकर्त्तेत्यर्थः । तदेष श्लोकः । तत् तस्मिन् संवत्सरस्वरूपे प्रजापतावेष वक्ष्यमाणः श्लोकः । वक्ष्यमाणेन श्लोकेन संवत्सरः प्रजापतेः स्वरूपमुपदिश्यत इत्यर्थः ॥१०॥

पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे

पञ्च पञ्चसंख्याकाः पादा ऋतुस्वरूपा यस्य तं पञ्चपादम् । यद्यपि षड्ऋतवो वसन्तादयस्तथापि हेमन्तशिशिरयोः शीतबाहुल्यस्य तुल्यत्वादेक-

पुरीषिणम् । अथेमे अन्य उ परे विचक्षणं सप्तचक्रे षडर आहुरर्पितमिति ॥११॥

मासो वै प्रजापतिस्तस्य कृष्णपक्ष एव रयिः शुक्लपक्षः प्राणः ॥

तामभिप्रेत्य पञ्चर्तुपादोऽयं संवत्सराख्यः प्रजापतिरित्युक्तम् । द्वादशाकृतिं मेषादिद्वादशराशिषु सूर्यसंक्रमणाद् द्वादशमासा भवन्ति त एव द्वादशमासा आकृतयोऽवयवा अवयवित्वसम्पादका अस्य तादृशम् । अवयवैरेव तन्तुभिः पटस्यावयवित्वं क्रियते संवत्सरप्रजापतेरप्यवयवित्वं द्वादशमासैरवयवैरेव सम्पाद्यतेऽतो द्वादशाकृतिरित्युच्यते सः । पितरं जनकं सर्वं प्रत्युत्पत्तिहेतुत्वात् संवत्सरस्य । दिवो द्युलोकात् पर उपरितनेऽर्धे स्थाने वर्तमानम् । पुरीषिणं पुरीषं जलं वृष्टिरूपेण कार्यमस्यास्तीति पुरीषी तम् । जलवृष्टिकारकत्वादयं पुरीषी सम्वत्सराख्यः प्रजापतिः प्राणादित्यशब्दव्यपदेश्यः । आदित्यस्य वृष्टिकारकत्वं प्रसिद्धमेवेति । सर्वभूतं संवत्सरप्रजापतिमाहुः कालतत्त्वविद इति शेषः । अथेमे अथशब्दः पक्षान्तरोपक्रममभिधत्ते । अन्ये पूर्वोक्तकालतत्वविदपेक्षया भिन्नाः पर उत्कृष्टा इमे कालतत्त्ववेत्तारः । इदं सर्वं जगद् विचक्षणं कुशलं यथा स्यात् तथा सम्यग् रूपेणेतियावत् । अर्पितं संवत्सराख्ये प्रजापतावित्याहुः । कीदृशे संवत्सर इत्यत्राह सप्तचक्रे षडरे । सप्तग्रहा एव राहुकेतू परित्यज्य सूर्यादयश्चक्राणि चंक्रमणशीलत्वाच्चक्रसदृशानि यत्र तादृशे । षड्ऋतव एव अरा रथनाभिप्रोतारस्थानीया यत्र तादृशे । ईदृशे संवत्सरप्रजापतौ रथे सर्वं जगत् समर्पितमास्त इत्यर्थः । पूर्वपक्षे ऋतूनां पादत्वं प्रकल्प्य मासानामवयवत्वं च प्रकल्प्यादित्यात्मा संवत्सर उक्तः । द्वितीयपक्षे ऋतूनामरत्वं ग्रहाणां चक्रत्वं च प्रकल्प्य जगदाश्रयत्वेन कालरूपः संवत्सर उक्तः । उभयत्र कल्पनाभेदेऽपि वस्तु न भिद्यत इत्यनुसंधेयम् ॥११॥

संवत्सरस्य प्रजापतेर्दक्षिणायनं रयिरुत्तरायणं प्राण इति विभागं प्रदर्श्य सम्प्रति मासाख्यप्रजापतेरपि रयिप्राणात्मना विभागं प्रदर्शयत्यु-

तस्मादेत ऋषयः शुक्ल इष्टिं कुर्वन्तीतर इतरस्मिन् ॥१२॥

अहो रात्रो वै प्रजापतिस्तस्याहरेव प्राणो रात्रिरेव रयिः । प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या सम्प्रयुज्यन्ते । ब्रह्मचर्यमेव तद् यद् रात्रौ रत्या संयुज्यन्ते ॥१३॥

अन्नं ह वै प्रजापतिस्ततो ह वै तद्रेतस्तस्मादिमाः प्रजाः प्रजायन्त इति ॥१४॥

पासनासिद्धये । मासो वै प्रजापतिः संवत्सराख्यप्रजापतिरेव स्वावयवमासात्मकोऽपि भवतीत्यर्थः । तस्य मासाख्यप्रजापतेः कृष्णपक्ष एव रयिरन्नं चन्द्र इत्यर्थः । शुक्लः शुक्लपक्ष एव प्राणोऽत्ताऽऽदित्यस्तस्माद् यतः शुक्लपक्षस्य प्राणत्वेनोत्कृष्टता तत एव हेतोरेते ये शुक्लपक्षस्य देवयानान्तर्गतत्वादुत्कर्षं जानन्ति त ऋषय अतीन्द्रियवस्तुदर्शनशीला ज्ञानिनः शुक्ले शुक्लपक्ष एवेष्टं यागादिशुभकर्माणि कुर्वन्त्यनुतिष्ठन्तीतरे शुक्लपक्षस्योत्कृष्टत्वमजानाना अज्ञानिन इतरस्मिन् कृष्णपक्षे रयित्वेनानुत्कृष्टे इष्टं यागादिकं कुर्वन्ति ॥१२॥

मासावयवभूताहोरात्रात्मकोऽपि प्रजापतिरस्तीत्युपासनार्थं प्रदर्शयति । अहोरात्रोऽहश्च रात्रिश्चाहोरात्रो दिनरात्रिरूपावयवद्वयात्मकः प्रजापतिरस्तीत्यर्थः। वैशब्दोऽवधारणार्थः । तस्य प्रजापतेरवयवात्मकमह एव प्राणोऽत्ताऽऽदित्यः। रात्रिरेव रयिरन्नमित्यर्थः । यस्मादहः प्राणरूपमत एव ये दिवाहोरात्राख्यप्रजापतेः प्राणस्वरूपे दिने रत्या रत्यर्थं सम्प्रयुज्यन्ते स्त्रीप्रसङ्गं कुर्वन्ति त एते प्राणमेव प्रस्कन्दन्ति वीर्यरूपेण प्राणमेव विक्षिपन्ति । क्षीणप्राणाः भवन्तीत्येतत् । अतो दिने मैथुनं वर्जनीयमिति प्रसङ्गाद् वर्णितम । यद् रात्रौ रत्या रतिप्रयोजनेन संयुज्यन्ते स्त्रीसङ्गं कुर्वन्ति तद् ब्रह्मचर्यमेव मैथुनमपि ब्रह्मचर्यतुल्यमेव, गृहस्थस्य ऋतौ विहितत्वेन प्रशस्तत्वात् । इदमपि प्रसङ्गादेव वर्णितम् । प्रकृतं त्वहोरात्रात्मकस्य प्रजापतेरग्रिममंत्रप्रतिपाद्यमन्नात्मनाऽवस्थानमेव ॥१३॥

अन्नं वै प्रजापतिरन्नात्मकोऽपि प्रजापतिरस्तीत्यर्थः । ततः तस्मादन्नात्मकप्रजापतेर्भक्षितादन्नादित्यर्थः । ह वै प्रसिद्ध्यवधारणार्थं निपात-

तद् ये ह वै प्रजापतिव्रतं चरन्ति ते मिथुनमुत्पादयन्ते । तेषामेष ब्रह्मलोकः । येषां तपो ब्रह्मचर्यं येषु सत्यं प्रतिष्ठितम् ॥१५॥

तेषामसौ विरजो ब्रह्मलोको न येषु जिह्ममनृतं न माया चेति ॥१६॥

इत्यथर्ववेदीयप्रश्नोपनिषदि प्रथमः प्रश्नः ।

—०—

द्वयम् । प्रसिद्धमेवैतदित्यर्थः । रेतो वीर्यं जायते, तस्मात् वीर्याच्चरमधातोर्योषिति सिक्तात् प्रजा मनुष्यादिरूपाः प्रजायन्ते प्रकृतिपुरुषसंवत्सरमासाहोरात्रान्नरेतोवस्थं परं ब्रह्मैव सर्वप्रजोत्पत्तिहेतुरित्यर्थः । अत एव प्रजापतिशब्देन प्रकृतः श्रीरामः परमात्मैव सर्वस्य जगत उपादानकारणमिति सिद्धं भवतीतिभावः ॥१४॥

अप्रशस्तप्रशस्तफलभागिताप्रदर्शनद्वाराऽमुमुक्षोर्निन्दां मुमुक्षोः स्तुतिञ्च मंत्रद्वयेन क्रमशो दर्शयति । तत्र पूर्वममुमुक्षूणां दृष्टाऽदृष्टरूपफलविशेषद्वयं निरूपयति । तद् ये ह वै निपातद्वयं प्रसिद्धिस्मरणार्थकम् । तत् तस्माद्धेतोर्ये प्रजापतिव्रतं चरन्ति प्रजापतिपदबोध्यस्यान्नस्य व्रतं भक्षणं कुर्वन्ति ऋतौ भार्यागमनलक्षणञ्च प्रजापतिव्रतं कुर्वन्ति न तु पशुन्यायेन यथाकामं मैथुनपरा भवन्ति ते धर्मप्रजापरा मिथुनं स्त्रीपुंलक्षणं संतानमुत्पादयन्ते, पुत्रपुत्र्यादिप्रजावन्तो भवन्त्यीत्येतत् । इदन्तु दृष्टं फलमस्यामुमुक्षोः प्रदर्शितम् । अदृष्टं फलं दर्शयितुमाह—तेषामेवैष ब्रह्मलोकः । तेषां विहितान्नभक्षणरूपमृतौभार्यागमनादिरूपञ्च प्रजापतिव्रतं ये चरन्ति तेषामेव ज्ञानविरहिणामप्यग्निहोत्रादिकर्मजन्यादृष्टसहकारवतामेष ब्रह्मलोकः कार्यब्रह्मलोको यतः पुनरावृत्तिर्भवति तादृशः पितृयाणमार्गमाश्रित्य गम्यश्चन्द्रलोकादिराहिरण्यगर्भान्तो भवति प्राप्यः । येषां तु तपः कायशोषणादिरूपं तपो ज्ञानं तच्च परमात्मविषयकम् । ब्रह्मचर्यमष्टविधमैथुनपरित्यागरूपं प्रतिष्ठितमस्ति येषु सत्यञ्च सदा सत्यवचनरूपं प्रतिष्ठितमव्यभिचारेण वर्तते, येषु जिह्मं जिह्मत्वं भावप्रधानो निर्देशः । तच्च मनो-

अथ द्वितीयः प्रश्नः

अथ हैनं भार्गवो वैदर्भिः पप्रच्छ । भगवन् कत्येव देवाः प्रजां विधारयन्ते कतरे एतत् प्रकाशयन्ते कः पुनरेषां वरिष्ठ इति ॥१॥

वाक्कायैर्वैलक्षण्यात्मकं कौटिल्यं नास्ति, ये सदा मनोवाक्कायैरेकरूपा भवन्ति त इति यावत् । अनृतं प्राणिमात्रानिष्टजनकं मिथ्या वचनं येषु नास्ति प्राणिहितकारकमेव ये वचनमुच्चारयन्ति त इत्यर्थः । येषु माया बहिरन्यथाप्रकाश्यान्यथाकरणरूपा नास्ति ये मिथ्याचाररता न भवन्ति तादृशा इत्यर्थः । तेषां कौटिल्यानृतभाषणमायारहितानां ब्रह्मचर्यपराणां परब्रह्म' श्रीरामज्ञानवतामेवासौ विरजो ब्रह्मलोको निर्दोषो ब्रह्मलोकोऽप्राकृतदेशरूपः साकेताख्यो लोको भवतीत्यर्थः । एतेन मुमुक्षूणां तत्प्राप्यप्रशस्तलोकफल-निरूपणद्वारा स्तुतिः प्रदर्शिता । प्रजापतिव्रतपरायणा अज्ञानिनः पुण्यक्षये पुनरापतन्ति ज्ञानिनस्तु न पुनरावर्तन्त इति निन्दास्तुत्योरभिप्रायः ॥१५।१६॥

इति भगवद्रामानन्दाचार्यकृतौ प्रश्नोपनिषद्भाष्ये प्रथमः प्रश्न ॥१॥

प्रजापतिशब्दितस्य परमात्मनः श्रीरामस्य स्रष्टृत्वं प्रथमप्रश्नप्रतिवचना-भ्यां निश्चित्य स्थितिकारणत्वनिर्णयाय द्वितीयः प्रश्न उपस्थाप्यते । अथ कबन्धिप्रश्नानन्तरमाह ह निश्चयेन । एनं पिप्पलादं वैदर्भिर्विदर्भ-स्यापत्यभूतो भार्गवगोत्र ऋषिः पप्रच्छ पृष्टवान् । प्रश्नस्वरूपमाह—हे भगवन् पूज्य पिप्पलाद कति किंसंख्याका एव देवाः प्रजां शरीर-स्वरूपां विधारयन्ते विशेषेण धारयन्ति येनैतच्छरीरं न पतति । शरीरञ्च स्थावरजङ्गमोभयात्मकमिहाभिप्रेतम् । कतरे देवा एतद् धारणलक्षणं प्रकाशयन्ते मत्कृतमेवेदं शरीरधारणमिति के जनेषु ख्यापयन्ति । एषां शरीर-धारणं कुर्वतां मत्कृतमेवेदं धारणमित्येवं स्वमाहात्म्यं ख्यापयताञ्च मध्ये कः कतमो देवो वरिष्ठः श्रेष्ठ इति । अत्र देवशब्देनाग्निमन्त्रोक्ता आकाशाद्य एव विवक्षितास्तेषां चाचेतनत्वात् कथं देवशब्देनाभि-

तस्मै स होवाच आकाशो ह वा एष देवो वायुरग्निरापः पृथिवी वाङ्मनश्चक्षुः श्रोत्रं च। ते प्रकाश्याभिवदन्ति वयमेतद्बाणमवष्टभ्य विधारयाम इति ॥२॥

तान्वरिष्ठः प्राण उवाच मा मोहमापद्यथाहमेवैत-

धानमितिचेदाकाशाद्यमिमानिदेवताविशेषग्रहणाय देवशब्देनोक्तिरिति गृहाण। वक्ष्यमाणाभिवदनादिव्यवहारस्य चैतन्यं विनाऽसम्भवित्वेन चैतन्यसंभावनाया उपयुक्ताया देवशब्देन कथने सुलभत्वमितिभावः ॥१॥

आख्यायिकामवतारयति पृष्टवस्तुनिर्णयाय। सः पिप्पलादस्तस्मै पूर्वोक्तप्रकारेण प्रश्नकर्त्रे वैदर्भ्य उवाच। एष देव आकाशो वायुरग्नि-रापः पृथिवीत्येतानि महाभूतानि शरीरारम्भकारीणि। एते कार्य-लक्षणा देवा वाङ्मनश्चक्षुः श्रोत्रं चेत्यत्र वाक्पदेन कर्मेन्द्रियाणि हस्तपादा-दीनि सर्वाण्युपलक्ष्यन्ते। मनःपदमन्तरिन्द्रियस्योपलक्षकम्। चक्षुःश्रोत्र-पदे तु ज्ञानेन्द्रियाणामुपलक्षके तेन बाह्येन्द्रियाणि ज्ञानकर्मोभयेन्द्रियरूपं मन इत्यन्तरिन्द्रियं च करणलक्षणा देवाः। ते सर्वे प्रकाश्य मत्कृत-मेवेदं शरीरधारणमिति लोकविदितं यथा स्यात्तथा प्रख्याप्याभिवदन्ति। अभितः कथयन्ति–किमित्यत्राह–एतद्बाणं बाणवत्संचरणशीलतया बाण-त्वोपचाराच्छरीरमेव बाणमुक्तम्। शरीरमवष्टभ्य यथा न पतति तथा दृढतया गृहीत्वा विधारयामो विशेषेण धारयामः। अवकाशदानादि-विविधकार्यक्षममिदं भवति येन प्रकारेण तेन प्रकारेण धारयाम इति भावः ॥२॥

एवं बाणविधारणाभिमानमवलोक्य वरिष्ठो मुख्यो जीवनविधारक इत्येतत्। प्राणः प्राणवायुस्तान् पूर्वोक्ताभिमानविशिष्टामुख्यान् प्रणानुवा-चोक्तवान्। किमुक्तवानित्यभिधत्ते मा मोहमापद्यथ। हे आकाशप्रभृतयः प्राणाः मोहमविवेकं तज्जन्यमभिमानं वा वयमेव शरीरविधारका इत्याकारकं माऽऽपद्यथ मा प्राप्नुत यस्माद्धेतोरहं मुख्यः प्राण एवा-त्मानं स्वरूपं पञ्चधा पञ्चप्रकारेण प्राणापानादिवृत्तिभेदप्रयुक्तप्राणापानो-दानव्यानसमानरूपेण विभज्य प्रकल्प्यैतद् दृश्यमानं बाणं शरीर-

Scanned by CamScanner

स्पञ्चधाऽऽत्मानं वभज्यैतद्बाणमवष्टभ्य विधारयामीति। तेऽश्रद्दधाना बभूवुः ॥३॥

सोऽभिमानादूर्ध्वमुत्क्रमत इव। तस्मिन्नुत्क्रामत्यथेतरे सर्व एवोत्क्रामन्ते। तस्मिंश्च प्रतिष्ठमाने सर्व एव प्रतिष्ठन्ते। तद्यथा मक्षिका मधुकरराजानमुत्क्रामन्तं सर्वा एवोत्क्रा-

मवष्टभ्य दृढं गृहीत्वा विधारयामीति। भवतामपि कार्यमवकाशप्रदानादि मदभावे नोपपद्येतातोऽहमेवैतद्विधारक इत्यभिप्रायः। ते आकाशादयोऽश्रद्दधाना बभूवुर्मुख्यप्राणवाक्ये विश्वासयुक्ता न जाताः। अयमेव विधारयति कथमेवं भवेदिति संशयाना एवासन्निति भावः ॥३॥

सः मुख्यः प्राणः आकाशादीनां विश्वासरहिततां विज्ञाय अभिमानान्मत्सान्निध्याधीनव्यापारा अप्येते मद्वाक्येऽश्रद्दधाना भवन्ति ततः पश्यन्तु मदभावे स्वकीयां गतिमित्येवंविधादहङ्कारादूर्ध्वं शरीरोर्ध्वभाग उत्क्रमत इव उत्क्रमणमिव कृतवान् किञ्चिदुद्गतोऽभूत्। इव शब्दस्योल्पत्वद्योतकत्वम्। तस्मिन् मुख्यप्राण उत्क्रामति स्वस्थानात् किञ्चिदुच्चलिते सति, अथ मुख्यप्राणोत्क्रमणानन्तरमेवेतरे चक्षुरादयः प्राणाः सर्व ऐवोत्क्रामन्त उत्क्रान्ता अभवन् स्वस्वस्थानादुच्चलिता जाता इत्येतत्। तस्मिन् मुख्यप्राणे शरीरविनिपातो मा भवत्वित्याशयेन पुनः प्रतिष्ठमाने स्वस्थाने प्रतिष्ठां गते स्थितिं लभमाने इति यावत्। सर्व एव चक्षुरादयः प्राणाः प्रतिष्ठन्ते स्वस्वस्थाने प्रतिष्ठां गता अभूवन्। अत्रार्थे सुखेनावगमाय दृष्टान्तं दर्शयति तथेति। तत् तत्र यथा लोके मक्षिका मधुकर्यः क्षुद्रजन्तुविशेषाः सर्वा एव संघीभूताः सत्यो मधुकरराजानं मक्षिकासु सर्वश्रेष्ठमक्षिकाविशेषमुत्क्रामन्तमेकस्मात् स्थानात् स्थानान्तरं गन्तुमुड्डीयमानमनूत्क्रामन्त उड्डीयन्ते तस्मिन् मधुकरराजे प्रतिष्ठमाने क्वचित् स्थानविशेषे स्थितिं लभमाने सति सर्वा एव मक्षिकास्तत्रैव प्रतिष्ठन्ते स्थिताः भवन्ति एवमनेनैव प्रकारेण वाङ्मनाचक्षुः श्रोत्रं च वाक्चक्षुःमनःश्रोत्रप्रभृतयः सर्वे-

मन्ते तस्मिंश्च प्रतिष्ठमाने सर्वा एव प्रातिष्ठन्त एवं वाङ्मनश्चक्षुः श्रोत्रं च । ते प्रीताः प्राणं स्तुन्वन्ति ॥४॥

एषोऽग्निस्तपत्येष सूर्य एष पर्जन्यो मघवानेष वायुः । एष पृथिवीरयिर्देवः सदसच्चामृतं च यत् ॥५॥

अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम् । ऋचो यजूं-

ऽपि प्राणाः मुख्यप्राणस्यानुगामिनो बभूवुरित्यर्थः । ते वाङ्मनःप्रभृतयः प्राणाः मुख्यप्राणसामर्थ्यदर्शनेन गताभिमाना अत एव प्रीताः प्रसन्नाः सन्तः प्राणं मुख्यप्राणं स्तुन्वन्ति स्तुवन्तिस्म ॥४॥

स्तुतिप्रकारमाह—एषोऽग्निरित्यादि । एषः मुख्यप्राण एवाग्नि-रग्निरूपः सन् तपति ज्वलति । एष मुख्यप्राण एव सूर्यः सूर्य-स्वरूपेण प्रकाशत इत्यर्थः । एष पर्जन्यः पर्जन्यरूपेण वृष्टिं करोति । एष मुख्यप्राण एव मघवानिन्द्रः इन्द्रस्वरूपेण त्रैलोक्यं पालयति, असुररक्षः-पिशाचादिभयं निवर्तयति च । एष मुख्यप्राण एव पृथिवी विश्वस्य धारिणी पृथ्वीस्वरूपेण सर्वं जगद् धारयतीत्यर्थः । एष एव रयिर्देव-श्चन्द्रः सन्-सर्वं पोषयति । एष एव सन्मूर्तिमत् स्थूलम्, यच्चा-सदमूर्त्तं सूक्ष्ममित्येतत् तदपि एष एव मुख्यः प्राणः । यच्चामृतममृ-तत्वापादकं पोयूषं तदपि एष एव । यद्वामृतमिति भावप्रधानो निर्देशः । तेन अमृतत्वं मुक्तिः तदपि एष एव मुख्यप्राणः । अग्न्यादीनां सर्वेषां प्राणाधीनस्थितिमत्वात् सामानाधिकरण्यम् ॥५॥

चक्रस्य मध्यभागगतोऽवयवो रथनाभिः । भूमिं स्पृशन् चरमोऽव-यवो नेमिस्तयोरन्तरालगतोऽवयवोऽर इत्युच्यते । रथनाभौ चक्रस्य मध्यप्रदेशेऽरा नाभिनेम्यन्तरालवर्तिनश्चक्रावयवा यथा प्रतिष्ठिता भवन्ति नाभिसंलग्ना भवन्तीत्येतत् । तथा सर्वमिदं जङ्गमाजङ्गमं जगत् प्राणे प्रतिष्ठितम् स्थितिकाले प्राण एव स्थितं भवतीत्यर्थः । तथा ऋचः ऋङ्मन्त्राः, यजूंषि यजुर्मन्त्राः, सामनि साममन्त्राः । वेदत्रयीति यावत्, तैस्त्रित्रिप्रकारैर्मन्त्रैः साध्यो यज्ञकर्मधिकारवत् क्षत्रं क्षत्रिय-

षि सामानि यज्ञः क्षत्रं ब्रह्म च ॥६॥

जातिर्यत् सर्वं परिपालयति ब्रह्म ब्राह्मणजातिर्यद् यज्ञादिकर्म त्रयीमन्त्रसाध्यं कारयति। सर्वमिदं प्राण एव एषः। 'यस्य ब्रह्म च क्षत्रं च उभे भवत ओदन' इति कठश्रुतिवदत्रापि ब्रह्मक्षत्रपदे स्थावरजङ्गमसकलप्राणिवर्गस्योपलक्षणे तेन स्थावरजंगमरूपं प्राणिजातं यत् तत्सर्वमेव एष प्राण एव । सर्वेषां प्राणाधीनस्थितिमत्त्वादिति भावः ॥६॥

प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायसे तुभ्यं प्राण प्रजास्त्वमा बलिं हरन्ति यः प्राणे प्रतितिष्ठसि ॥७॥

सम्प्रति मुख्यप्राणं साक्षात्सम्बोध्य स्तोतुमुपक्रमते—हे प्राण ! त्वमेव प्रजापतिः प्रजानां रक्षको भवद् गर्भे चरसि प्राणापानादिरूपेण गर्भसञ्चारं करोषि । गर्भपरिपालनायेति भावः । एवं त्वमेव प्रतिजायसे गर्भोत्पादकतया पितृरूपस्त्वं गर्भपोषकतया मातृस्वरूपश्च त्वं यद्यपि वर्तस एव तथापि पितृमात्रनुरूपेण पुत्ररूपेणापि त्वमेव भवसीत्यर्थः। यत एवं प्राणैः प्राणापानादिस्वरूपैः प्राणिषु प्रतितिष्ठसि प्रतिष्ठितो भवसि । यद्वा प्राणैश्चक्षुरादिभिः सार्धं सर्वप्राणिशरीरेषु प्रतितिष्ठसि । तस्मै तुभ्यमिमा मनुष्यादिरूपाः प्रजाः बलिमन्नपानादिरूपं भोज्यमुपहरन्ति समर्पयन्ति प्रत्यहमत एव भोक्तृरूपोऽसीति भावः ॥७॥

देवानामसि वह्नितमः पितॄणां प्रथमा स्वधा। ऋषीणां चरितं सत्यमथर्वाङ्गिरसामसि ॥८॥

हे प्राण देवानामिन्द्रादीनां वह्नितमो वहति प्रापयति देवेभ्यो हविर्द्रव्यं यः स वह्निरतिशयितो वह्निर्वह्नितमोऽअतिशयेन हविर्द्रव्य प्रापकस्त्वमेवासि । तथा पितॄणामग्निष्वात्तादीनां प्रथमा स्वधा प्राथम्येन देवापेक्षयाऽन्नप्रापिका स्वधा त्वमेव । स्वहाशब्देन देवा हविः प्राप्नुवन्ति स्वधाशब्देन तु पितरः पिण्डमुपगच्छन्ति देवयागापेक्षया प्रथमं पितृभ्यो नान्दीश्राद्धमवश्यकर्तव्यतया विहितमस्ति । स्वाहापेक्षया

इन्द्रस्त्वं प्राण तेजसा रुद्रोऽसि परिरक्षिता । त्वमन्तरिक्षे चरसि सूर्यस्त्वं ज्योतिषां पतिः ॥ ९ ॥

यदा त्वमभिवर्षस्यथेमाः प्राण ते प्रजाः । आनन्दरूपास्तिष्ठन्ति कामायान्नं भविष्यतीति ॥१०॥

व्रात्यस्त्वं प्राणैकर्षिरत्ता विश्वस्य सत्पतिः । वयमाद्यस्य दातारः पिता त्वं मातरिश्व नः ॥११॥

स्वधायाः प्राथम्यमुक्तम् । अथर्वाङ्गिरसामथर्वाङ्गिरःप्रभृतीनामृषीणां सत्यमुत्कृष्टं पवित्रत्वात् । चरितमाचारो नित्यनैमित्तिकक्रियारूपः तदपि त्वमेवासि । त्वयि सत्येव स्वाहास्वधाकारनित्यनैमित्तिककर्माणि सम्भवन्ति नान्यथाऽतस्त्वमेवैतत्सर्वमितिभावः ॥८॥

हे प्राण इन्दति परमैश्वर्यवान् भवति यः स इन्द्रः परमेश्वरः त्वमसि । तेजसा संहारकतेजोविशेषेणोपलक्षितो रुद्रः सर्वरोदनकारित्वात् त्वमेवासि । स्थितिकाले रक्षणोपयुक्तेन सौम्येन तेजसोपलक्षितः परिरक्षिता विष्णुस्वरूपेण परिपालकस्त्वमेवासि । ज्योतिषां तेजस्विनां पतिस्तेजस्विषु श्रेष्ठः सूर्य आदित्यरूपः सन् त्वमेवान्तरिक्ष आकाशे चरसि भ्रमसि ॥९॥

हे प्राण यदा प्रावृट्काले त्वं पर्जन्यरूपः सन्नभिवर्षसि अभितो जलवृष्टिं करोषि तदा ते त्वदीया इमाः प्रजा आनन्दरूपा आनन्दप्रचुरा आनन्दं रूपयन्तीत्यानन्दरूपा आनन्दं मन्यमाना इति वा तिष्ठन्ति, आसामानन्दे हेतुं प्रथयति कामायान्नं भविष्यतीति कामाय अभिलषितसिद्धयेऽन्नं पर्याप्तं भविष्यति यतो प्रभूता वृष्टिर्जातेत्याशावन्त इत्यर्थः । प्रभूतान्नसंभावनाजन्य आनन्दस्तासां भवतीति भावः ॥१०॥

हे प्राण व्रात्यः श्रुतिनियमितकालावधिकसंस्काररहितो विप्रादिस्त्वमेव । आषोडशवर्षात् सावित्रीग्रहणं न चेत् स्यात्तदा स ब्राह्मणो व्रात्य इत्युच्यते, तथा क्षत्रियवैश्ययोरपि सावित्रीग्रहणकालातिक्रमे व्रात्यता भवतीति ध्येयम् । एकोऽद्वितीय ऋषिर्मन्त्रार्थद्रष्टाऽपि त्वमेव । उच्चावचप्राणिजातं त्वमसीति भावः । विश्वस्यात्ता संहारकारकोऽपि त्वमसि तथा

या च ते तनूर्वाचि प्रतिष्ठिता या श्रोत्रे या च चक्षुषि। या च मनसि सन्तता शिवां तां कुरु मोत्क्रमीः ॥१२॥

प्राणस्येदं वशे सर्वं त्रिदिवे यत्प्रतिष्ठितम्। मातेव पुत्रान् रक्षस्व श्रीश्च प्रज्ञां विधेहि नः ॥१३॥

इत्यथर्ववेदीयप्रश्नोपनिषदि द्वितीयः प्रश्नः ॥२॥

सत्पतिः सतां साधूनां पतिः पालकोऽपि त्वमेवासि। वयं चक्षुरादयः प्राणाः ते तुभ्यमायस्य अदनीयस्यान्नपानादेर्दातारः समर्पकाः किंकरा इव भवामः। हे मातरिश्व त्वं नोऽस्माकं पिता परिपालकोऽसि। मातरिश्वन् शब्दे नकारस्य लोपः छान्दसः ॥११॥

या च ते त्वदीया तनूरपानरूपा वाचि वागिन्द्रिये प्रतिष्ठिता वर्तमानाऽस्ति, या च तनुर्व्यानरूपा श्रोत्रे श्रोत्रेन्द्रिये प्रतिष्ठिता, या च प्राणरूपा तनुश्चक्षुषि प्रतिष्ठिता, या च समानरूपा मनसि प्रतिष्ठिता, स प्राणस्तच्चक्षुः स व्यानस्तच्छ्रोत्रं सोऽपानः सा वाक् स समानस्तन्मन इति श्रुतेः वागादिषु प्राणेषु मुख्यप्राणस्य तवैव नियमनशक्तेः सकाशाद् वक्तृत्वादिकमस्तीतिभावः। संततां समनुगतां तां तनुं शिवां कुरु, त्वत्तनुसन्निधानेनैव वागादीनां स्वस्यव्यापारप्रवणतारूपं शिवत्वमस्ति, अन्यथा स्वस्वव्यापाराऽसमर्थतया वागादयोऽशिवा भवेयुः। अतः मोत्क्रमीः, उत्क्रमणं स्वस्थानाच्चलनं तन्मा कार्षीः, तवोत्क्रमणेऽस्माकममाङ्गल्यं भवेदितिभावः ॥१२॥

इदं सर्वम् इह लोके दृश्यमानं सकलमपि मनुजाद्युपभोगयोग्यं वस्तु, यच्च त्रिदिवे तृतीयस्यां दिवि स्वर्गलोके देवगन्धर्वाद्युपभोगयोग्यं प्रतिष्ठितं वर्तते तत्सर्वं प्राणस्य मुख्यप्राणस्य तव वशे त्वदिच्छाधीनमस्ति। अतः पुत्रानात्मजान् मातेव प्रसूरिवास्मान् वागादीन् रक्षस्व परिपालयस्व, माता पुत्रापराधमगणयित्वैव पुत्रान् रक्षति। तवैव त्वदीयवाक्येऽश्रद्धातः कृतापराधमस्माकमगणयित्वा नः पालयेति भावः। किंच श्रीः स्वकार्यसम्पादनशक्तिरूपा या अस्माकं श्रियस्ताः तदनुकूलबुद्धिरूपां प्रज्ञाञ्चास्माकं विधेहि कुरुष्व। एवं वागादिभिः परिष्टुतस्य मुख्यप्रा-

अथ तृतीयः प्रश्नः ।

अथ हैनं कौशल्यश्चाऽऽश्वलायनः पप्रच्छ । भगवन् कुत एष प्राणो जायते । कथमायात्यस्मिञ्शरीरे । आत्मानं वा प्रविभज्य कथं वा प्रतितिष्ठते । केनोत्क्रमते । कथं बाह्यमभिधत्ते कथमध्यात्ममिति ॥१॥

तस्मै स होवाच । अतिप्रश्नान् पृच्छसि ब्रह्मिष्ठोऽसि तस्मात्तेऽहं ब्रवीमि ॥२॥

नस्य सर्वात्मत्वावधारणद्वारा शरीरादिधारकत्वं श्रेष्ठत्वञ्चावधारितम् । अतः प्रजापतिः प्राण एवात्तेति निश्चितमिति भावः ॥१३॥

इति भगवद्रामानन्दाचार्यविरचितेऽथर्ववेदीयप्रश्नोपनिषद आनन्दभाष्ये द्वितीयः प्रश्नः ॥२॥

—०—

अथ वैदर्भिप्रश्नानन्तरं मुख्यप्राणस्य शरीरादिधारकत्वं श्रेष्ठत्वञ्चावधार्य स्वावयवतया संघातरूपस्यास्य समुदीरितो महिमा नानवधिकातिशयो भवितुमर्हति तादृशो महिमा कस्यचिदपरस्य स्यादसंहतस्येत्यभिप्रायवानाश्वलायनपुत्रः कौशल्यः पप्रच्छ पृष्टवान् भगवन्तं पिप्पलादम् । प्रश्नाकारमभिधत्ते—भगवन्नित्यादि । हे भगवन् पूज्य पिप्पलादेत्यर्थः । एष धारकत्वश्रेष्ठत्वादिना निर्णीतः प्राणो मुख्यप्राणवायुः कुतः कारणाज्जायते समुत्पद्यते । उत्पन्नश्च अस्मिन् शरीरे कथमायाति किन्निमित्तमस्यागमनं भवति शरीर इत्यर्थः । आगतश्चास्मिन् शरीर आत्मानं प्रविभज्य पृथक् पृथग् विधाय कथं केन प्रकारेण प्रतितिष्ठते प्रतिष्ठितो भवति । केन प्रकारेणोत्क्रमतेऽस्माच्छरीराद् बहिर्याति । बाह्यं शरीराद् बहिर्भूतमधिभूतमध्यात्मं शरीरान्तर्गतं चाभिधत्तेऽभितो धारयति । बाह्योऽभ्यन्तरं च धारणं केनरूपेण कुरुत इत्यर्थः ॥१॥

स पिप्पलाद आचार्यः कौशल्येन मुख्यप्राणोत्पत्त्यादिकं पृष्टः सन् तस्मै एवं पृष्टवते कौशल्यायोवाच प्रोक्तवान् । हशब्दो वितर्के । अति-

आत्मन एवैष प्राणो जायते। यथैषा पुरुषे छायैतस्मिन्नेतदाततं मनोकृतेनायात्यस्मिञ्शरीरे ॥३॥ यथा सम्राडेवाधिकृतान् विनियुङ्क्ते।

प्रश्नान् कबन्धिवैदर्भिप्रश्नानतिक्रम्य वर्तमानान् प्रश्नान् पृच्छसि। तदीयप्रश्ने प्राणस्यापि कारणीभूतः परमात्मा श्रीरामो रहस्यार्थो विषयो नासीत्। तव तु प्रश्ना रहस्यार्थमयाः इत्यतिप्रश्ना इति भावः। यस्मात्त्वं रहस्यभूतार्थप्रष्टाऽतो ब्रह्मिष्ठोऽसि ब्रह्मविदिव प्रतीयसे। तस्माद् योग्यत्वात् ते तुभ्यमहं त्वत्पृष्टं ब्रवीमि प्रतिवच्मि। भव श्रवणपरस्त्वमिति भावः ॥२॥

कुतो जायत इति प्रथमप्रश्नस्योत्तरमाह—आत्मनः परमात्मन एव परमकारणादेष मुख्यप्राणो वर्णितमहिमाऽपि जायत उत्पद्यते। कथमायातीतिद्वितीयप्रश्नस्योत्तरं वक्तुं दृष्टान्तं प्रदर्शयति पूर्वं यथैषेति। पुरुषे करचरणाद्यवयववति जीवे छाया एषा दृश्यमाना आतता पुरुषगमनागमनप्रयुक्तगमनाऽगमनवती भवति तथैव एतस्मिन् जीव एतत्प्राणतत्त्वमाततं संबद्धम्। मनोकृतेन मनसा कृतं मनोकृतम्। हृशपरत्वाऽभावेऽपि छान्दसमुत्त्वम्। मनोजन्यसंकल्पाधीनं हि कर्म पुण्यपापरूपं मनोकृतमित्युक्तम्। तथाच पुण्यपापात्मककर्मरूपानमित्तेन जीवस्य कर्मफलभोगाय प्राणतत्त्वं जीवेन सहैवास्मिन् शरीर आयाति प्रविशतीत्यर्थः* ॥३॥

---

*आरे तु—'यथा लोक एषा पुरुषे शिरःपाण्यादिलक्षणे निमित्ते छाया नैमित्तिकी जायते तद्वदेतस्मिन् ब्रह्मण्येतत् प्राणाख्यं छायास्थानीयमनृतरूपं तत्त्वं सत्ये पुरुष आततं समर्पितमि'ति व्याचक्षते। ते प्रष्टव्याः 'प्राणस्य मिथ्यात्वं कस्मादिति ? न च ब्रह्मभिन्नस्य कृत्स्नस्य जगतोऽपरमार्थत्वेन तदन्तर्गतस्य प्राणस्यापि मिथ्यात्वमिति शक्यते वक्तुम्, ब्रह्मभिन्नस्य कृत्स्नस्य मिथ्यात्वे 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवती' त्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधप्रसङ्गात्। कृत्स्नस्य जगतो मिथ्यात्वेऽपि ब्रह्मणि ज्ञाते सर्वस्य ज्ञातत्वे सत्यमिथ्यात्वयोरेकत्वं ब्रह्मणो मिथ्यात्वं वा प्रसज्येदितिभावः। न च ब्रह्मणः सत्यत्वज्ञानेन तद्व्यतिरिक्तं मिथ्यात्वेन ज्ञातं स्यादिति वाच्यम्, मिथ्यात्वेनेत्यध्याहारप्रसङ्गात्,

Scanned by CamScanner

एकविज्ञानस्य सर्वविज्ञानस्य च वैरूप्यात्, ज्ञात्रभावात् सर्वविज्ञानपदस्य सर्वज्ञाननिवृत्तौ लक्षणाप्रसङ्गाच्च । न चाधिष्ठाने ब्रह्मणि ज्ञाते तस्मिन्न-ध्यस्तः प्रपञ्चो विज्ञातः स्यादेवेति वाच्यम्, एवमपि प्रपञ्चसत्यत्वस्य दुर्निवारत्वात । तथाहि—स्वोपादानतया ब्रह्मानाश्रयणे ब्रह्मोपादानत्वभङ्गः स्यादतः स्वोपदानत्वेन ब्रह्माश्रयणमेव युक्तमाध्यासिकस्य प्रपञ्चस्य । तदपि च कुण्डबदरवत् सतोरेव वस्तुनोराश्रयाश्रयिभावस्य लोके शास्त्रे च प्रसिद्धत्वेन सत्तयैव मन्तव्यम् । तथात्वे च प्रपञ्चसत्यत्वम्प्राप्तमेव निवारयितुमशक्यताम् । शुद्धस्य ब्रह्मण उपादानत्वाभावे तु 'यतो वा इमानि भूतानि जायन्ते' इत्याद्यनेकश्रुतिव्याकोपः स्यात् । श्रुतिभिरध्यस्तस्यैवोपादानत्वाभिधानं तु बालक्रीडनकमेव । उक्तञ्च श्रीरामानन्दभाष्ये यतिसार्वभौमैर्जगद्गुरुश्रीरामानन्दाचार्यैः—एतेन "यस्मात्परं नापरमस्ती" (श्वे ३।९) त्याद्युपनिषत्सु "क्षेत्रज्ञञ्चापि मां बिद्धी" (गी० १३ । २) त्यादिस्मृतिषु च प्रपञ्चमिथ्यात्वपूर्वकम्परमार्थतोऽद्वैतमेव ब्रह्माभिधीयत इति मायिमतं सर्वं प्रत्याख्यातं वेदितव्यम् । दुराग्रहमात्रैकसाधनत्वात् । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाभङ्गप्रसङ्गाच्च । ननु तन्मते ब्रह्मातिरिक्तं वस्त्वन्तरं सर्वपदाभिलप्यमस्ति यद्विज्ञानमेकविज्ञाननियतं स्यादिति । न च ब्रह्मस्वरूपेऽवगते तदध्यस्तं प्रपञ्चजातं ज्ञातमेव । अधिष्ठानमेव ह्यारोपितवस्तुनः स्वरूपम् । तद्व्यतिरेकेण वस्तुभूतस्य कल्पनामात्रलब्धसत्ताकस्य तस्य निर्देष्टुमशक्यत्वादिति वाच्यम् । विकल्पासहत्वात् । तथा हि—आध्यासिकः प्रपञ्चः स्वोपादानतया ब्रह्माश्रयति न वा ? आद्ये स्वरूपसत्तयाऽसत्तया वा ? यदि सत्तयेत्यभिधत्से हन्त ! तर्हि आगतं प्रपञ्चे सत्यत्वम् । अथ चासत्तयेत्यन्तिमं पक्षं कक्षीकरोषि चेदमन्दमुपहास्यम् । आश्रयाश्रयिभावश्च सतोरेव कयोश्चिद्वस्तुनोः कुण्डबदरयोरिव लोकेशास्त्रसिद्धः । द्वितीये ब्रह्मोपादानवादभङ्गप्रसङ्गः । ननु शुद्धस्य चिद्वस्तुनो नास्त्येवोपादानत्वमिति चेन्न । "यतो वे" (तै० ३ ।१ । १) त्यादिश्रुतिव्याकोपप्रसङ्गात् । अतोऽध्यस्तोपादानमेव श्रुतिरभिधत्त इति चेत्को ह्यर्थोऽनेन बालक्रीडनेन साधितः स्याद् भगवत्या श्रुत्या । अतः प्रपञ्चसत्यत्वमेवेतिदिक् । (रामानन्दभाष्य १।१।१)

किञ्च ब्रह्मभिन्नञ्जगदपरमार्थमिति कथमवगतम् ? नच जगदपरमार्थं व्यावर्त्तमानत्वादित्यनुमानेनेति वाच्यम्, ब्रह्मणोऽनृतादिभ्यो व्यावृत्तत्वेन हेतोस्तत्रानैकान्त्यात् । वाधितत्वस्योपाधित्वेन सोपाधिकत्वाच्च । किञ्च किमिदं नाम व्यावर्त्तमानत्वम् ? किञ्चापारमार्थ्यम् ? नच व्यावर्त्तमानत्वमभावप्रतियोगित्वमपारमार्थ्यञ्च कादाचित्कास्तित्वमितिवाच्यम्, घटादौ सिद्धसाधनात् । न चापि व्यावर्त्तमानत्वं तूक्तमेवापरमार्थ्यञ्च वाध्यत्वमिति शक्यते वक्तुम्, विकल्पासहत्वात् । तथाहि—वाध्यत्वं नाम नास्तीतिबुद्धिविषयत्वम् ? त्रैकालिकनिषेधविषयत्वं वा ? नादिमम्, यदा यन्नास्ति तदा तस्य नास्तीतिप्रतीयमानत्वेनाभावप्रतियोगित्वेन च सिद्धसाधनात् । नाप्यन्तिमम्, विकल्पासहत्वात् । भवत्यत्र द्वितीयकल्पे विकल्पः—हेतुभूतमभावप्रतियोगित्वं किं त्रैकालिकाभावप्रतियोगित्वात्मकमुत कादाचित्काभावप्रतियोगित्वात्मकम् ? नाद्यमसिद्धेः । नापि द्वितीयम्, जगत् त्रैकालिकसत्ताशालि कदाचित्सत्तावत्वाद् ब्रह्मवदिति हेतोः सत्प्रतिपक्षितत्वात् । यदि च व्यावर्त्तमानत्वं सदनुविद्धप्रतीत्यविषयत्वं तदा वक्तव्यं यत् सदनुविद्धप्रतीत्यविषकत्वमित्यनेन सदनुविद्धप्रतीतिसामान्याविषयत्वं विवक्षितमुत सदनुविद्धप्रतीतिविशेषाविषयत्वम् ? नाद्यः, 'घटोऽस्ति पटोऽस्ति' इत्यादीनां सर्वासाम्प्रतीतीनां घटपटादिविषयकत्वमनङ्गीकृत्य सन्मात्रविषयकत्वाङ्गीकारे बहुविधभेदप्रत्यक्षतद्व्यवहारागृहीतग्रहणान्धवधिरादि व्यवस्थायाः प्रत्यक्षकरणेन्द्रियभेदव्यवस्थायाश्चापह्नवप्रसंगात् । घटं दृष्ट्वा घटार्थिनः प्रवृत्तेः पटार्थिनश्च निवृत्तेरनुपपत्तेश्च । किञ्च तदा घटोऽस्तीत्यत्राविषयत्वाविशेषेण पटशब्दस्येव घटशब्दस्यापि प्रयोगाभावः प्रसज्येत । तदाऽस्तीत्येवोच्यतां न तु घटोऽस्तीति भावः । नापि द्वितीयः, घटोऽस्तीतिप्रतीत्यविषयत्वेऽपि पटस्यान्यत्र सत्तायां बाधकाभावात् । अन्यथा ब्रह्मणोऽप्युक्तप्रतीत्यविषयत्वाविशेषान्मिथ्यात्वम्प्रसज्येत । न चास्त्येव सद्रूपेग ब्रह्मण उक्तप्रतीतिविषयतेति वाच्यम्, घटश्चलति पटश्चलति घटो महान् पटोमहानित्यादिषु गुणक्रियादिवदुक्तप्रतीतौ घटधर्मत्वेनैव सत्ताया भासमानत्वात् । ब्रह्मणो घटधर्मत्वाभावान्नोक्तप्रतीतौ ब्रह्मणः सद्रूपेण भानमिति भावः । ब्रह्मणः शास्त्रकसमधिगम्यत्वेनोक्तप्रतीतिविषयत्वाभावाच्च । अन्यथा शास्त्रस्य प्राप्तानुवादरूपत्वम्प्रसज्येत । अथोक्तप्रत्यक्षात् प्राग-

Scanned by CamScanner

ज्ञातमेव शास्त्रेण बोध्यत इति चेन्न विकल्पासहत्वात् । तथाहि—उक्तप्रत्यक्षं किं ब्रह्मैवोत तज्ज्ञानम् ? नादिमः ब्रह्मणो नित्यत्वेनोक्तप्रत्यक्षात् प्रागिति कथनासंगतेः । नाप्यन्तिमः तादृग्ज्ञानजनकसामग्र्यभावात् ।

किञ्च व्यावर्त्तमानत्वात्मकस्य साधनस्य किम् परमार्थ्यमुतापारमार्थ्यम् ? नाद्यः, द्वैतापत्तेः । नाप्यन्त्यः, धूमबुद्ध्या गृहीतस्यानलासाधकस्य बाष्पस्येव व्यावर्त्तमानत्वस्यापि मिथ्यात्वासाधकत्वेन व्याघातापत्तेः । ननु नाशकस्य मुद्गरादेर्नाशेऽपि पूर्वनष्टस्य घटादेर्नाशस्यैव दर्शनादुत्पत्त्यभावदर्शनाच्च यथा नाशकस्य मुद्गरादेरविनाशित्वं नापेक्ष्यते तथैवात्रापि साधनस्य पारमार्थ्यं नापेक्षितं बाधकज्ञानस्यापारमार्थ्ये सत्यपि तद्बाधितस्य मिथ्यात्वे बाधकाभावादिति चेन्न कारकज्ञापकयोर्वैषम्यात् । कारकं हि नाशकमतः कारके मुद्गरादौ नष्टेऽपि तन्नाश्यस्य घटादेर्नाश एव तथा दर्शनात् । ज्ञापकन्तु बाधकमतो ज्ञापके बाधिते तद्बाध्यस्य सत्यत्वमेव स्यात् केनचिच्चत्वरस्थघटाभाव उक्तेऽस्तीति बाधिते घटसत्यत्वदर्शनात् । एवमपारमार्थ्यात्मकस्य साध्यस्य पारमार्थ्यमपरमार्थ्यं वा नाद्योऽद्वैतहानेः । नाप्यन्त्यः प्रपञ्चसत्यत्वापत्तेः ।

किञ्चोक्तानुमाने पक्षोऽप्रतीतः प्रतीतो वा ? नादिम आश्रयासिद्धेः । नाप्यन्तिमः प्रत्यक्षादिप्रमाणैः सत्यतयैव प्रतीतत्वेन तन्मिथ्यात्वसाधनस्य धर्मिग्राहकप्रमाणबाधितत्वात् । किञ्चात्र पुरुषच्छायाया गृहीतत्वात् स्वायत्तगमनागमनाभावस्य परायत्तगत्यागतिकत्वस्य च व्यज्यमानत्वेन छायाग्रहणस्यानृतत्वव्यञ्जकत्वाभावान्न प्राणतत्त्वस्यानृतत्वाभिधाने तात्पर्यं महर्षेः पिप्पलादस्य । अन्यथा पुरुष इति विशेषाभिधानस्यास्वारस्यं प्रसज्येत । यदि नामात्रानृतत्वं विवक्षितं स्यात्तदाऽविशेषाद् यथैषा मूर्त इत्येव यथैषा छायेत्येव वा श्रयेतेति भावः । किञ्च यदि छायाया अनृतत्वं स्यात्तदा घटेतापि प्राणानृतत्वाभिधानस्य युक्तत्वन्नाम । न च छायाया अनृतत्वं शक्यते वक्तुम् "तमः ससर्ज भगवान्" "यस्य तमः शरीरम्" 'छायायां संगृहीतायां चिन्तयामास मारुतिः' (वाल्मीकि रा० सु० का०) इत्यादिवचनप्रतिपादितानां तमसः सृष्टिशरीरत्वग्रहणानामनुपपत्तेः ॥ ३ ॥

[इति प्रश्नोपनिषदो वैष्णवभाष्ये पण्डितसम्राट्स्वामिश्रीवैष्णवाचार्याः ।]

Scanned by CamScanner

एतान्ग्रामानेतान् ग्रमानधितिष्ठस्वेत्येवमेवैष प्राण इतरान् प्राणान् पृथक् पृथगेव संनिधत्त ॥४॥

पायूपस्थे अपानं चक्षुःश्रोत्रे मुखनासिकाभ्यां प्राणः स्वयं प्रतितिष्ठते मध्ये तु समानः । एष ह्येतद्धुतमन्नं समं नयति तस्मादेताः सप्तार्चिषो भवन्ति ॥५॥

आत्मानं वा प्रविभज्य कथं प्रातिष्ठत इति तृतीयप्रश्नस्य प्रतिवचनं दातुमुपक्रमते यदा सम्राडिति । यथा येन प्रकारेण सम्राट् चक्रवर्ती महाराजोऽधिकृतान् तत्तत्कर्मविभागे नियुक्तानधिकारिपुरुषान् त्वमेतानेतावत्संख्याकान् ग्रामानधितिष्ठस्व नियमय, त्वञ्चैतान् ग्रामानधितिष्ठस्वेति- स्वयं विनियुंक्ते, तेषां नियुक्तिं तेषु-तेषु ग्रामेषु करोति। एवमेव अनयैव रीत्या एष पूर्वोक्तो मुख्यप्राण इतरान् स्ववशे स्थितान् वागादीन् प्राणान् पृथक् पृथक् स्वांशभूतप्राणापानसमानादिद्वारेण सन्निधत्तेऽधिष्ठति । अत्र ग्रामस्थानीया अमुख्याः प्राणा वागादयः । अधिकारिपुरुषस्थानीयाः प्राणापानव्यानसमानोदाना मुख्यप्राणांशाः । मुख्यप्राणस्तु सम्राट्स्थानीय इति विवेकः। अधिकारिपुरुषाणामधिकारो यथा परस्परं संकीर्णो न भवति तथा प्राणापानादीनामपि न सङ्कीर्णोऽधिकार इति द्विरुक्तेन पृथक्पदेन सूच्यते ॥ ४ ॥

प्राणस्यात्मविभागेन कुत्राधिष्ठातृत्वमिति विशेषतो दर्शयति—पायूपस्थे। पायुश्चोपस्थश्च पायूपस्थं गुदं मूत्रेन्द्रियञ्च। प्राण्यङ्गत्वादेकवद्भावः। तस्मिन् मूत्रपुरीषापकर्षणाय अपानमपानात्मकं स्वात्मभेदं प्रकल्प्य तद्रूपेण पायूपस्थे ग्रामस्थानीयेऽधितिष्ठति । चक्षुश्च श्रोत्रञ्च चक्षुःश्रोत्रं तस्मिन् ग्रामस्थानीये मुखनासिकाभ्यां निर्गमनशीलः प्राणः सम्राट्स्थानीयः स्वयमेव प्रातिष्ठतेऽधिष्ठाता भवतीत्यर्थः। मध्ये तु प्राणापानयोः स्थानस्य मध्यभागे नाभ्यां समानः सन् समानरूपमात्मभेदं कृत्वाधिष्ठतीत्यर्थः। एष समानो हि यस्माद् हुतं भुक्तं जाठराग्नौ प्रक्षिप्तमेतद् दृश्यमानमन्नमन्नफलमूलजलादिकं सर्वं वस्तु समं नयति तत्तद्धातुनिर्माणाय यथा—योग्यं विभजति अतः समान इत्युच्यत इति भावः। तस्मात् समानादेव

हृदि ह्येष आत्मा अत्रैकशत नाडीनां तासां शतं शतमेकैकस्यां द्वासप्ततिर्द्वासप्ततिः प्रतिशाखानाडीसहस्राणि भवन्ति तासु व्यानश्चरति ।६॥

वायोरशितपीतान्नादिद्वाराऽभिदीप्तस्य जाठराग्नेर्हृदयदेशं प्राप्तस्यताः प्रसिद्धाः अस्माभिर्ज्ञायमानाः श्रवणदर्शनादिरूपाः सप्तसंख्याका अर्चिषो ज्वालाः तद्वत्प्रकाशिका इत्येतद् । भवन्ति प्रादुर्भूता भवन्ति ॥ ताश्च श्रवणद्वयं चक्षुर्द्वयं घ्राणद्वयमास्यञ्चैकमिति सप्तसंख्याः शीर्षण्या अर्चिषः शब्दादिविषयप्रकाशकत्वाच्छ्रवणादिष्वर्चिष्ट्वमारोपितम् । अन्नरसमिन्द्रियाणामाप्यायनं भवत्यतो भवन्तीति शब्देन प्रादुर्भूतिः कथितेत्यनुसंधेयम् ॥५॥

मुख्यप्राणो व्यानात्मकं स्वात्मभेदं प्रकल्प्य सर्वासु नाडीषु स्थितः सन्नधिष्ठितीति प्रतिपादयितुं तासां नाडीनां प्रदेशं दर्शयति प्रथमं हृदि ह्येष इति। एष आत्मा जीवात्मा हृदि हृदये पुण्डरीकाकारहृदयाकाशे वर्तते । अत्र हृदयप्रदेशे नाडीनामेकशतं विद्यत इति शेषः । प्रधानभूता नाड्य एकाधिकशतसंख्याका हृदयप्रदेशे वर्तन्त इत्यर्थः । तासां प्रधाननाडीनां मध्य एकैकस्यां नाड्यां शतं शतं प्रभेदाः सन्ति । प्रधाननाड्या एकैकस्याः प्रभेदाः शाखानाडीरूपाः शतसंख्यान्विताः सन्तीत्यर्थः । तेन शाखानाड्य एकशताधिकदशसहस्रसंख्याका भवन्तीति भावः । द्वासप्ततिर्द्वासप्ततिः प्रतिशाखानाडीसहस्राणि भवन्ति । शाखानाडीनामुक्तसंख्याकानां मध्य एकैकस्याः शाखानाड्या अवान्तरप्रभेदाः प्रतिशाखानाडीरूपा द्विसहस्राधिकसप्ततिसहस्रसंख्याकाः सन्तीत्यर्थः । ततश्च मूलनाड्यः शाखानाडयः प्रतिशाखानाड्यश्च सर्वा मिलित्वा द्वासप्ततिकोटयो द्वासप्ततिलक्षाणि दशसहस्राणि शतद्वयमेका च भवन्तीति भावः । शतंशतमितिवीप्सा प्रत्येकं प्रधाननाडीसम्बन्धार्था । द्वासप्ततिर्द्वासप्ततिरिति वीप्सा प्रत्येकं शाखानाडीसम्बन्धार्था । तासु प्रोक्तसंख्यावतीषु मूलशाखा प्रतिशाखानाडीषु व्यानश्चरति । मुख्यप्राणो व्यानरूपं स्वात्मभेदं कृत्वा तेन रूपेण तासु त्रिविधासु नाडीषु भ्रमतीत्यर्थः ॥६॥

Scanned by CamScanner

अथैकयोर्ध्व उदानः पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्यलोकम् ॥७॥

आदित्यो ह वै बाह्यः प्राण उदयत्येष ह्येनं चाक्षुषं प्राणमनुगृह्णानः पृथिव्यां या देवता सैषा पुरुषस्यापानमुपष्टभ्य अन्तरा यदाकाशः स समानो वायुर्व्यानः ॥८॥

आत्मानं वा प्रविभज्य कथमिति प्रश्नस्यावशिष्टांशं प्रतिवचनं केनोत्क्रमत इति प्रश्नस्य प्रतिवचनेन सहैव दातुमुपक्रमत अथेति। अनन्तरं व्यानसंचारप्रदेशनिरूपणानन्तरमित्यर्थः । एकया सुषुम्नाभिधानयोर्ध्वमुखया मूर्धानमभिसृतया नाड्योक्तनाडीष्वन्यतमयोर्ध्वे ऊर्ध्वगमनवानुदानः सन् मुख्यप्राण उदानरूपमात्मप्रविभागं कृत्वा तेन रूपेणेति यावत । सञ्चरन् पुण्येन शास्त्रविहितेन कर्मणा पुण्यं लोकं स्वार्गादिकं नयति प्रेतान् प्राणिन इति शेषः। पापेन शास्त्रनिषिद्धेन कर्मणा प्रेतान् पापं लोकं नरकादिकं नयति। उभाभ्यामेव पुण्यपापाभ्यां संमिश्राभ्यां धर्माभ्यां मनुष्यलोकं मानवशरीरं सुकृतदुष्कृतोभयफलकं नयति प्रापयतीत्यर्थः। अत्र मन्त्रः केनोत्क्रमत इति प्रश्नस्य प्रधानतया उत्तरमभिहितम्। आत्मानमुदानरूपेण प्रविभज्येत्यंशः कथमात्मानं प्रविभज्येति प्रश्नस्योत्तरमित्यनुसंधेयम् ॥७॥

कथं बाह्यमभिधत्ते कथमध्यात्ममित्यस्य प्रश्नस्योत्तरं वदति - आदित्य इति। हवैशब्दौ प्रसिद्धयर्थकौ। प्रसिद्धो मुख्यः प्राणो बाह्य आदित्यः सन् बहिरादित्यरूपेणेत्यर्थः । उदयत्युदयं प्राप्नोति। किं कुर्वन्नित्यत्राह—एष हि दृश्यमान आदित्यरूपः प्राण एनं चाक्षुषं प्राणं पूर्वोक्तं चक्षुर्वर्त्तिनं चक्षुःश्रोत्रे मुखनासिकाभ्यां प्राणः (प्र० ३।५) इत्यत्रोक्तं प्राणमाध्यात्मिकं प्राणवायुमनुगृह्णानश्चक्षुषा प्रत्यक्षरूपे कार्ये कारयितव्य आलोकरूपसहकारिप्रदानेन साहाय्यमाचरन्नित्यर्थः । वर्तत इति शेषः । अत्र कथं बाह्यमित्यस्योत्तरमुदयतीत्यन्तेन दत्तमंशतः। चाक्षुषं प्राणमनुगृह्णान इत्यन्तेन कथमध्यात्ममिति प्रश्नस्योत्तरमुक्तमिति ध्येयम्। एवमुत्तरत्रापि चिन्त्यम् । पृथिव्या या देवता पृथिव्यभिमानिनी देवतेत्यर्थः । बाह्यपृथवीगतदेवतारूपेण मुख्यः प्राणो बाह्यमभिधत्ते

तेजो ह वा उदानस्तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियै-र्मनसि सम्पद्यमानैः ॥९॥

यच्चित्तस्तेनैष प्राणमायति प्राणस्तेजसा युक्तः

इति योजना कार्या। बाह्यधारणं कुरुत इति तदर्थः। सैषा देवता पृथिव्यभिमानिनी देवता पुरुषस्य शरीरभृतोऽपानमाध्यात्मिकमपानवायुमवष्टभ्य वर्ततेऽपानवायुरधोऽपकृष्यानुग्रहं कुर्वाणो वर्ततेऽत एव शरीरपातो न भवति। पृथिव्या धारणशक्त्या शरीरस्य धृतत्वादिति भावः। अन्तरा द्यावापृथिव्योर्मध्ये यदाकाशो बाह्याकाशस्तेन बाह्येन रूपेण मुख्यप्राणो बाह्यधारणं कुरुत इत्यर्थः। स बाह्याकाशस्वरूपो मुख्यप्राणः समानः समानानुग्राहकतया समानपदेन व्यपदिश्यते। आध्यात्मिकं समानवायुमनुगृह्णानो विद्यत इत्यर्थः। वायुर्बाह्यो वायुः स व्यानो व्यानवायुमाध्यात्मिकमनुगृह्णात्यतो व्यानशब्देन व्यपदिश्यते। मुख्यप्राणो बाह्यरूपेण बाह्यधारणं कुरुते, शरीरगतव्यानवायुमनुग्रह्णानः सन् वर्ततेऽतोऽध्यात्मधारणं च कुरुत इत्यर्थः ॥ ८ ॥

प्रसिद्धं यत् बाह्यं तेजः सामान्यात्मकं तेज इत्यर्थः। आदित्यशब्देन पूर्वं तेजोविशेष उक्तो न सामान्यमिति न पुनरुक्तिः। उदान उदानवायुमाध्यात्मिकमनुगृह्णातीत्यत उदानशब्देन व्यपदिश्यते। मुख्यप्राणः सामान्यतेजोरूपेण बाह्येन बाह्यधारणं कुरुते। उदानवायुं शरीरगतमनुगृह्णानो वर्तते तस्मादध्यात्मधारणं च कुरुत इत्यर्थः। बाह्यतेजोरूपेण मुख्यप्राणस्योदानवाय्वनुग्रहे लिङ्गं प्रदर्शयति। तस्माद् यत उत्क्रमणस्वभावोप्युदानो वायुर्बाह्यतेजोऽनुग्रहेणैव न शरीरान्निष्क्रामति बाह्यतेजोऽनुग्रहाभावे तूदानोत्क्रमणे सति प्राणी उपशान्ततेजा विगतजाठराग्निप्रयुक्तशरीरौष्ण्यः सन्निन्द्रियैर्वागादिभिर्मनसि सम्पद्यमानैः "वाङ् मनसि सम्पद्यते मनः प्राणे" इत्युक्तरीत्या मनसा सह संसर्गविशेषप्राप्तैरिन्द्रियैरुपलक्षितः सन् पुनर्भवं पुनरुत्पत्तिं शरीरान्तरमित्यर्थः। प्राप्नोतीति शेषः ॥ अत्रापि बाह्यतेजोरूपेण मुख्यप्राणस्य बाह्यधारणमुक्तम्। उदानानुग्रहरूपेण त्वध्यात्मधारणमुक्तमिति ध्येयम् ॥ ९ ॥

उपशान्ततेजाः शरीरान्तरं प्रतिपद्यत इत्युक्तं तत् केन प्रकारेणेत्यत्राह मुमूर्षुर्जीवो यच्चित्तो यस्मिन् चित्तं यस्य स यच्चित्तो यत्कामनावान्

सहात्मना यथा सङ्कल्पितं लोकं नयति ॥१०॥

य एवं विद्वान् प्राणं वेद न हास्य प्रजा हीयतेऽमृतो भवति । तदेष श्लोकः ॥११॥

उत्पत्तिमायतिं स्थानं विभुत्वञ्चैव पञ्चधा । अध्यात्मं चैव प्राणस्य विज्ञायामृतमश्नुते इति विज्ञायामृतमश्नुते॥१२॥

इत्यथर्ववेदीयप्रश्नोपनिषदि तृतीयः प्रश्नः ॥ ३ ॥

—०—

भवति । चित्तशब्दस्य चित्तसंकल्पपरत्वात् । तेन संकल्पविषयमनुष्यदेवादि-शरीरकामेन युक्तः प्राणमायाति मुख्यप्राणसंसर्गविशेषं प्राप्नोत्येष जीवः । तं स प्राणः तेजसा उदानानुग्राहकेण पूर्वोक्तेन भूतसूक्ष्मेण सामान्यात्मकेन तेजसा युक्त आत्मनेन्द्रियसंश्लेषविशेषविशिष्टेन मनसा सह यथासंकल्पितं संकल्पविषयभूतं मनुष्यदेवादिशरीरं तत्तल्लोकगतं नयति प्रापयति ॥ १० ॥

यः कोऽपि विद्वानेवं पूर्वोक्तप्रकारेण कुतः प्राण उत्पद्यते, केना-याति, कथं प्रतिष्ठते, केनोत्क्रमते कथं बाह्यमध्यात्मं चाभिधत्त इतिप्रश्नोत्तर-रूपेणोक्तैरुत्पत्तिसमागमनप्रतिष्ठादिविशेषणैर्विशिष्टं प्राणं मुख्यप्राणं वेद जानाति । उपास्त इत्येतत् । अस्योपासकस्य प्रजा पुत्रपौत्रादिरूपा न हीयते न छिद्यते । प्रजाहानिर्न भवतीत्यर्थः । अमृतो भवति परमात्मोपासनाद्वारा मुक्तोऽपि भवतीत्यर्थः । अत्र मुक्तिर्मुख्यं फलम् । प्राणोत्पत्तिकारणतया परमात्मविज्ञानात् प्रजाविच्छेदराहित्यं तु फलमानुषङ्गिकं भवतीतिध्येयम् । तदेषश्लोकः तत् तस्मिन्नर्थे एतत्खण्डे प्रश्नोत्तररूपेण प्रतिपादिते वस्तुनि प्राणोत्पत्त्यागत्यादिरू। एष वक्ष्यमाणः श्लोको मंत्रो भवत्येतदर्थप्रतिपादको भवत्यग्रिमो मंत्रः संक्षेपेणेत्यर्थः ॥११॥

प्राणस्य परमात्मनः सकाशादुत्पत्तिमायतिं मनःसंकल्पजाभ्यां पुण्यपापाभ्यां निमित्तभूताभ्यामस्मिन् शरीर आगमनम् । स्थानं पायूपस्थादिषु स्थानेषु स्थितिम् । विभुत्वं सम्राडेवाधिकृतानित्यादिना सदृष्टान्तमितरप्राणापेक्षया स्वामित्वम् । अध्यात्मं शरीरमध्ये पञ्चधा

Scanned by CamScanner

अथ चतुर्थः प्रश्नः ॥

अथ हैनं सौर्यायणी गार्ग्यः पप्रच्छ । भगवन्नेतस्मिन् पुरुषे कानि स्वपन्ति । कान्यस्मिञ्जाग्रति । कतर एष देवः स्वप्नान् पश्यति । कस्यैतत्सुखम् । कस्मिन्नु सर्वे प्रतिष्ठिता भवन्ति ॥१॥

प्राणापानादिरूपेण बहिश्चादित्यादिरूपेण पञ्चधा पञ्चभिः प्रकारैः संनिधानञ्च विज्ञाय ज्ञात्वा विशेषरूपेणामृतं मोक्षमश्नुते प्राप्नोति । द्विरुक्तिः प्रश्नार्थप्रतिवचनसमाप्तिबोधनार्था ॥१२॥

इतिश्रीभगवद्रामानन्दाचार्यविरचिते प्रश्नोपनिषद आनन्दभाष्ये तृतीयः प्रश्नः ॥ ३ ॥

—०—

अथ कौशल्यप्रश्नानन्तरमेनं पिप्पलादं गुरुम् । गार्ग्यः गर्गगोत्रोत्पन्नः सौर्यायणीतिनामा शिष्यः पप्रच्छ पृष्टवान् । हे भगवन् पिप्पलाद ! एतस्मिन् दृश्यमाने पुरुषे पुरुषशब्देनाभिलप्यमाने शरीरे प्राणमनःप्रभृतिसंघातरूपे सुप्तोऽयं पुरुष इति व्यवहारकाले कानि स्वपन्ति स्वव्यापारोपरतानि भवन्ति । अस्मिन् पुरुषे पूर्वोक्ते सुप्ते सति कानि जाग्रति जागरणं कुर्वन्ति स्वव्यापारपराणि भवन्तीत्यर्थः । एषः कतरो देवो यो देवो द्योतनादिगुणवान् स्वाप्नान् स्वप्ननिर्मितान् पदार्थान् हस्त्यश्वादिरूपान् पश्यति स कतरो जीवो वा मनो वेत्यर्थः । मनसोऽपि स्वप्नावस्थायामिन्द्रियसहकारमनक्ष्पेयैव स्वाप्नवस्तुप्रकाशकत्वात् । जीवे तु द्रष्टृत्वं प्रसिद्धमेवेति भावः । एतत् सुप्तोत्थितेन पुरुषेण परामृश्यमानं सुखमहमस्वाप्समिति, सुखं कस्य किंसम्बन्धि ? विषयसम्बन्ध्यात्मस्वरूपसम्बन्धि वेत्यर्थः । सर्वे यानि स्वपन्ति यानि जाग्रति यदीयमेतत्सुखं ते तदन्ये च जाग्रत्स्वप्नव्यापारोपरत्यां सत्यां सुषुप्तिकाले कस्मिन् प्रतिष्ठिताः स्थितिं लभमाना भवन्ति । नु शब्दः शंकायाम् ॥१॥

Scanned by CamScanner

तस्मै स होवाच । यथा गार्ग्य मरीचयोऽर्कस्यास्तं गच्छतः सर्वा एतस्मिंस्तेजोमण्डल एकी भवन्ति ताः पुनरुदयतः प्रचलन्त्येवं ह वै तत्सर्वं परे देवे मनस्येकीभवति । तेन ह्येष पुरुषो न शृणोति न पश्यति न जिघ्रति न रसयति न स्पृशति नाभिवदते नादत्ते नानन्दयते न विसृजते नेयायते स्वपितीत्याचक्षते ॥२॥

स पिप्पलादः तस्मै गर्गगोत्राय सौर्यायणीतिनाम्ने शिष्यायोवाच प्रतिवचनं दत्तवान् । हेति प्रसिद्धौ । किमित्यत्राह—हे गार्ग्य यथाऽस्तं गच्छतोऽदर्शनं प्राप्नुवतोऽर्कस्य सूर्यस्य सायंकालीनस्य सर्वा मरीचयः सर्वेऽपि किरणा एतस्मिन् दृश्यमाने तेजोमण्डले सूर्यबिम्बे एकीभवन्ति दिग्विदिग्भ्यः परावृत्य विवेकानर्हतया संसर्गविशेषमुपयान्ति । ताः मरीचय उदयत उदयं गच्छत आदित्यस्य सम्बन्धिन्यः पुनः प्रचलन्ति दिग्विदिक्षु प्रसृता भवन्ति । एवमनयैवरीत्या तत्सर्वमिन्द्रियजातं परे प्रकृष्टे चक्षुरादिभ्य इन्द्रियेभ्यो देवे द्योतनादिगुणयुक्ते मनसि अन्तःकरण एकीभवति स्वस्वव्यापारक्षमं यथा न भवति तथा संश्लेषविशेषमुपगच्छति । स्वप्नसमये इति शेषः । तेनेन्द्रियाणां स्वस्वव्यापाराक्षमत्वस्य तदानीं सत्त्वेन हेतुना एष पुरुषो जीवः सुषुप्तो न शृणोति शब्दान् श्रावणप्रत्यक्षान् न कुरुते । न पश्यति द्रष्टव्यान् घटादीन् पदार्थान् चाक्षुषप्रत्यक्षविषयान् कर्तुं न पारयति । जाग्रद्दशायामिव तदानीमित्यर्थः । न जिघ्रति गन्धादिकं घ्राणजप्रत्यक्षविषयं न विधत्ते । न रसयते रसान् मधुरादीन् रसनाजन्यप्रत्यक्षविषयान् न संपादयति । न स्पृशति स्पर्शनेन्द्रियजन्यं प्रत्ययं स्पर्शादिविषयकं तस्य न भवतीत्यर्थः । नाभिवदते वागिन्द्रियव्यापारं शब्दोच्चारणरूपं न करोति । नादत्ते हस्तेन्द्रियव्यापारं वस्त्वादानात्मकं न विधत्ते । नानन्दयत आनन्दमुपस्थेन्द्रियकार्यं नैव तदा कुरुत इत्यर्थः । न विसृजते, अपानकार्यं मलविसर्जनरूपं नाचरति । नेयायते गमनक्रियारूपं पादेन्द्रियकार्यं न करोतीत्यर्थः । स्वपिति इत्येव जना एनं तदा-

Scanned by CamScanner

प्राणाग्नय एवैतस्मिन्पुरे जाग्रति गार्हपत्यो ह वा एषोऽपानो व्यानोऽन्वाहार्यपचनो यद्गार्हपत्यात्प्रणीयते प्रणयनादाहवनीयः प्राणः ।३।।

यदुच्छ्वासनिःश्वसावेतावाहुती समं नयतीति समानः ऽऽचक्षते कथयन्ति । एतेन कानि स्वपन्तीत्यस्य प्रश्नस्योत्तरं प्रोक्तं भवतीन्द्रियाण्येव स्वपन्तीत्यात्मकमिति बोध्यम् ।। स्वपितीत्येकवचनप्रयोगस्त्विन्द्रियाणां बहुत्वेऽपि प्रत्येकमेकत्वमेव तेषामित्याशयेनैव ।।२।।

वागादिष्विन्द्रियेषु प्रसुप्तेष्वेतस्मिन् पुरे पुरसदृशे देहे । द्वारवत्त्वेन पुरस्य देहे सादृश्यं बोध्यम् । प्राणाग्नयः प्राणाः पञ्चसंख्याकाः प्रसिद्धाः तद्रूपा अग्नयः प्राणाग्नयो जाग्रति शरीरधारणलक्षणं स्वव्यापारं कुर्वाणा भवन्ति । यद्यपि प्राणानां वायुरूपाणामग्नित्वमप्रसिद्धं तथापि तेष्वग्नित्वारोपोऽग्निहोत्रदृष्टिविधानार्थः । गार्हपत्यो ह वेषोऽपान एष मूलाधारगतोऽपानवायुर्गार्हपत्यो गार्हपत्याग्निरित्यर्थः । अपानस्य गार्हपत्यत्वे हेतुमाह यद्गार्हपत्यात्प्रणीयते प्रणयनाद् यद् यस्मात् कारणात् प्रणयनाद् गार्हपत्यात् प्रणीयत आहवनीय इति योजना । प्रणयनादिति विशेषणं गार्हपत्यादित्यस्य । प्रणीयत आहवनीयोऽस्मादिति प्रणयनो गार्हपत्यः, गृहपतेर्यजमानस्य गृहसंबन्धो वह्निर्गार्हपत्यः । तदग्निमध्याद् होमायाग्निः ऋत्विग्भिर्नीयते यज्ञकुण्डे । स नीयमानोग्निराहवनीय इत्युच्यते । व्यानोऽन्वाहार्यपचनः । व्यानवायुरन्वाहार्यपचनो दक्षिणाग्निरित्युच्यते । हृदयस्य पंचसु सुषिरेषु मध्ये दक्षिणासुषिरतो व्यानस्य निर्गमनादन्वाहार्यपचनसादृश्याच्चान्वाहार्यपचन इत्युच्यते । आहवनीयः प्राणः प्राणवायुरेवाहवनीय इत्यर्थः । अयं भावः यथा गार्हपत्यादग्नेराहवनीयोऽग्निः प्रणीयते तथैव अधःस्थितादपानात् प्राणवायुरुन्नीयते हृदयादूर्ध्वं तस्मादपानो गार्हपत्यत्वेन रूपितः । प्राणरूपाहवनीयत्वेन रूपित इति ।।३।।

यद् यस्मादेतौ दृश्यमानावुच्छ्वासनिःश्वासावेवाहुती । अग्निहोत्राहुतिद्वयमित्यर्थः । एतदाहुतिद्वयमुच्छ्वासनिःश्वासात्मकं हविःस्था-

मनो ह वाव यजमान इष्टफलमेवोदानो य एनं यजमानमहर-हर्ब्रह्म गमयति ॥४॥

अत्रैष देवः स्वप्ने महिमानमनुभवति । यद् दृष्टं दृष्टमनुपश्यति श्रुतं श्रुतमेवार्थमनुश्रृणोति देशदिगन्तरैश्च

नीयं समं नयति साम्येन शरीरस्थितये प्रापयत्याहवनीयं प्रतीत्यतो हेतोः समान इत्युच्यते । अयमेव होतेत्यर्थः । यतो हेतोराहुतिर्नयत्याहवनीये बह्नौ । समानोऽपि उच्छ्वासनिःश्वासरूपाहुतिद्वयं नयत्याहवींयं प्राणं प्रतीति भावः । मनो ह वा यजमानो यागाधिकृत एव जनो यागे यजमान इत्युच्यते । स चात्र मनोऽन्तःकरणमेव तस्यैव शब्दादिनानाविधविषयदेश-परिभ्रमणप्रयुक्तश्रमापनोदाय स्वापाग्निहोत्रे प्रवृत्तत्वात् । इष्टफलमेव उदानः । इष्टं यागोऽत्राग्निहोत्ररूपस्तस्य फलं पुण्यरूपमुदानः । उदानवायुरेव यथा यागफलं पुण्यमेव यजमानं नयति स्वर्गादिलोकं प्रति तथा उदान एव मनो-रूपं यजमानं पुरीतद्देशवर्तिब्रह्मगमयतीत्युदाने इष्टफलत्वमारोपितम् । तदाह —य एनं यजमानमहरहरिति । य उदान एनं मनोरूपं यजमानं यागा-धिकृतमहरह प्रतिदिनं स्वापकाले ब्रह्म गमयति । पुरीतद्देशवर्त्तिनं ब्रह्म प्रापयतीत्यर्थः । स्वापकाले जीवस्यैव ब्रह्मगमनमन्यत्रापि यद्यपि निर्दिष्टम् "एवमेवेमाः प्रजा अहरहर्गच्छन्त्य" (छा० ८।३।१२) इत्यादौ ब्रह्मणो व्यापकतया पुरीतत्प्रदेशेऽपि सत्वात् । मनसश्च तत्र गमनान्मनसो ब्रह्मगमनं सम्भवत्येवेति भावः । प्राणाग्नय एव जाग्रतीत्येतदंशेन कानि जाग्रतीति द्वितीय-प्रश्नस्योत्तरं दत्त्वाऽपानव्यानप्राणेषु त्रितयवह्नित्वम्, उच्छ्वासनिःश्वासयोराहुति द्वयत्वम्, समानवायौ होतृत्वम्, मनसि यजमानत्वमुदाने च यागव्यापारभूत पुण्यत्वमारोप्याग्निहोत्रत्वसम्पत्तिः स्वापे दर्शिता । सा विदुषः कर्मविशेष-एव भवति स्वापोऽपीति बोधनार्थेति ध्येयम् ॥४॥

कतर एष देवः स्वप्नान् पश्यतीतिप्रश्नस्योत्तरं ददाति—अत्रैष इति । अत्र अस्मिन् काले सुषुप्तितः पूर्वस्मिन् प्राणादिपञ्चव्यापारवति इन्द्रियव्यापाररहिते च काल इत्यर्थः । एष देवो जीवात्मा स्वप्ने महिमानं

Scanned by CamScanner

प्रत्यनुभूतं पुनः पुनः प्रत्यनुभवति दृष्टं चादृष्टं च श्रुतं चाश्रुतं चानुभूतं चाननुभूतं च सच्चासच्च सर्वं पश्यति ॥५॥

स यदा तेजसाऽभिभूतो भवति । अत्रैष देवः

विभूतिं राजदेवादिभावलक्षणां रथगजतुरगवत्वलक्षणां चानुभवति साक्षात्करोति जागरे श्रोत्रादिसहायेन यः पश्यति सोऽधुना श्रोत्रादिरहितोऽपि द्रष्टुं समर्थ इत्यभिप्रायेण देव इति विशेषणम् । महिमानमेव प्रपञ्चयितुमाह यद् दृष्टं दृष्टमनुपश्यति जागरे दृष्टं दृष्टं पुनः पुनर्यद् वस्तु दृष्टं मित्रपुत्रादिलक्षणं तदनु पश्चात् स्वप्नकाले पश्यत्यनुभवतीत्यर्थः । श्रुतं श्रुतं भूयो जागरे श्रावणप्रत्यक्षविषयीकृतं शब्दजातमेवानुश्रृणोति । स्वापेऽपि श्रावणप्रत्यक्षगोचरं करोतीत्यर्थः । देशदिगन्तरैश्च देशाश्च दिशश्चेति देशदिशः, अन्या देशदिशो देशदिगन्तराणि तेषु देशान्तरेषु विभिन्नासु दिक्षु च प्रत्यनुभूतं प्रतिदिनमनुभूतमनुभवविषयतां नीतमर्थं घटपटादिपदार्थजातं पुनः पुनः प्रत्यनुभवति । पौनःपुन्येन अनेकेषु स्वप्नेष्वनेकेषु वासरेष्वनुभवतीत्यर्थः । पूर्वं दृष्टमेव नियमतोऽनुभवति स्वप्ने इत्यपि नास्तीत्यतोऽदृष्टमपीति वदति दृष्टं चादृष्टं च इह जन्मनि जागरे यद् दृष्टं तदपि पश्यति, जन्मान्तरदृष्टमिहजन्मनि चादृष्टं यद् वस्तु तदपि पश्यतीत्यर्थः । श्रुतं श्रवणगोचरीकृतं पूर्वम्, अश्रुतं कदाचिदपि न श्रोत्रजज्ञानविषयतां गतमपि शब्दजातमनुश्रृणोतीत्यर्थः । अनुभूतं स्वानुभवगोचरं स्वसुखदुःखादिकमननुभूतं स्वकीयशिरोवैकल्यादिकञ्च पश्यति । सत् च विद्यमानं भूतले यद् वस्तु तत् पश्यति, यच्च असत् अविद्यमानं भूतं भावि वा स्वपुत्रादिकं तदपि पश्यतीत्यर्थः । सर्वं पश्यति यदत्रोक्तं यच्चानुक्तं सर्वं पश्यति किमधिककथनेनेतिभावः । सर्वः पश्यति द्रष्टा श्रोता गन्तेत्यादि सर्वरूपः सन् पश्यति । स्वप्नस्रष्टृश्रोत्रादिमत्त्वस्य तदानीं तस्मिन् भावादिति भावः ॥५॥

कस्यैतत्सुखमिति प्रश्नं प्रतिवक्तुमाह—स यदेति । स स्वप्नद्रष्टा जीवो यदा तेजसा परमात्मना अभिभूतो भवति । संपरिष्वक्तो भवति "सता सौम्य

स्वप्नान्न पश्यति । तदैतस्मिञ्छरीर एतत्सुखं भवति ॥६॥

स यथा वयांसि वासोवृक्षं संप्रतिष्ठन्ते । एवं ह वै तत्सर्वं परे आत्मनि संप्रतिष्ठते ॥७॥

पृथिवी च पृथिवीमात्रा चापश्चापोमात्रा च तेजश्च तेजोमात्रा च वायुश्च वायुमात्रा चाकाशश्चाकाशमात्रा च चक्षुश्च द्रष्टव्यं च श्रोत्रं च श्रोतव्यं च घ्राणं च घ्रातव्यं

तदा संपन्नो भवति तेजसा हि तदा संपन्नो भवति" इति श्रुतौ तेजसेत्यनेन परमात्मनो ग्रहणादिह तेजःपदं परमात्मवाचकमनुसंधेयम् । अत्रास्मिन्नवसरे परमात्मना सह परिष्वङ्गकाल एष देवो जीवः स्वप्नान् स्वप्नगतान् पदार्थान् रथतुरगादिलक्षणान् न पश्यति । तदानीं मनसोप्यपरिशेषात् तस्यापि परमात्मनि संश्लेषात् । अथ तत् सुषुप्तोत्थितेन परामृश्यमानं 'सुखमहस्वाप्त्समि'त्येवं जातीयकमात्मस्वरूपसम्बन्धिसुखं यत् तदेतत् सुखं शरीरे भवति शरीरान्तर्गतमेव भवति न शरीराद् बहिर्भवतीत्यर्थः । सुषुप्तिकाले स्वात्मसुखसंवेदनमेव भवति यत्परामृश्यते लोकैर्जागरकाले नान्यत् तत्सुखमिति भावः ॥६॥

कस्मिन्नु सर्वे संप्रतिष्ठिता इति प्रश्नं प्रतिवदति-स यथेति । हे सौम्य प्रियदर्शन वयांसि पक्षिण वासोवृक्षं वासार्थो वृक्षो वासोवृक्षः तं प्रति निवासतरुं प्रतीत्यर्थः । वासोवृक्षशब्द ओकारश्छान्दसः । संप्रतिष्ठन्ते दिवाऽऽहारार्थं स्वाभीप्सितान् देशान् गत्वा ततः परावृत्ताः श्रान्ताः पक्षिणो निवासवृक्षं श्रमापनोदाय संश्रयन्ते यथा येन प्रकारेण । एवमेवंप्रकारेणैव ह वै प्रसिद्धमेतदित्येतत् । तत्सर्वं यत् कार्यकारणभावमाप्तुमर्थजातं शब्दादिरूपं यच्च तद्ग्रहणजनकमिन्द्रियं चक्षुरादि यच्च मनः प्राणपञ्चकं जीवश्च तत्सर्वं पर आत्मनि परब्रह्मणि संप्रतिष्ठते । सर्वे सुषुप्तिकाले एकीभवन्ति संपरिष्वक्ता भवन्ति । अविभक्तभावं गच्छन्तीत्यर्थः ॥७॥

पूर्वमन्त्रे "तत्सर्वं परे आत्मनि संप्रतिष्ठते" इत्युक्तम् । तद्गतसर्वशब्दार्थं विवृणुतेऽनेन मंत्रेण । पृथिवी रूपरसादिगुणपञ्चकविशिष्टा

च रसश्च रसयितव्यं च त्वक्च स्पर्शयितव्यं च वाक्च वक्तव्यं च हस्तौ चादातव्यं चोपस्थश्चानन्दयितव्यं च पायुश्च विसर्जयितव्यं च मनश्च मन्तव्यं च बुद्धिश्च बोद्धव्यं चाहङ्कारश्चाहङ्कर्त्तव्यं च चित्तं च चेतयितव्यं च तेजश्च विद्योतयितव्यं च प्राणश्च विधारयितव्यं च ॥८॥

पञ्चीकृता स्थूला निरीक्ष्यमाणाऽस्मदादिभिरपि । पृथिवीमात्रा सूक्ष्माऽपञ्चीकृता गन्धतन्मात्रपदव्यपदेश्या स्थूलपृथिव्याः कारणभूता । आपः स्थूलजलात्मिकाः । आपोमात्रा रसतन्मात्रा, आपोमात्रेत्यत्र छान्दसत्वाद् विभक्तेरलुक् । तेजः पञ्चीकृतं स्थूलं तेजःसामान्यम् । तेजोमात्रा रूपतन्मात्रा । वायुः स्थूलो वायुः । वायुमात्रा स्पर्शतन्मात्रा । आकाशः स्थूलाकाशः । आकाशमात्रा शब्दतन्मात्रा । स्थूलसूक्ष्माणां कार्यकारणभावं गतानां भूतानामयं प्रपञ्च उक्तः । अत इन्द्रियतदर्थान् प्रपञ्चयति—चक्षू रूपादिग्राहकमिन्द्रियम् । द्रष्टव्यं तदीयविषया रूपादयः । श्रोत्रं च शब्दग्राहकमिन्द्रियम् । श्रोतव्यम् तद्विषयाः शब्दादयः । घ्राणं गन्धग्राहकमिन्द्रियम् । घ्रातव्यं गन्धगन्धत्वादिकं तदीयो विषयः । रसः रसग्राहकं रसनेन्द्रियं । रसयितव्यं रसनाग्राह्यो रसादिर्विषयः । त्वक् स्पर्शोपलम्भकमिन्द्रियम् । स्पर्शयितव्यं त्वगिन्द्रियग्राह्यं स्पर्शवद्द्रव्यं स्पर्शादिश्च । एतावद् ग्रन्थेन बाह्यज्ञानेन्द्रियतदीयविषयाः प्रपञ्चिताः । वाक् च वागिन्द्रियं शब्दोच्चारणसाधनम् । वक्तव्यं वाचोच्चारणीयानि वर्णपदबोध्यानि । हस्तौ आदानसाधनमिन्द्रियं पाण्यपरपर्यायम् । आदातव्यं पाणिनेन्द्रियेण ग्राह्यं वस्तु घटपटादिकम् । उपस्थो जननेन्द्रियम् । आनन्दयितव्यं जननेन्द्रियसाध्य आनन्दविशेषः । पायुर्मलत्यागकारीन्द्रियं गुदाऽपरपर्यायम् । विसर्जयितव्यं परित्याज्यं कोष्ठान्तर्गतनिस्सारभूतं वस्तु मलापरपर्यायम् । पादौ गमनसाधनमिन्द्रियम् । गन्तव्यं ग्रामादिदेशः । एतावता कर्मेन्द्रियतद्विषयाः प्रपञ्चिताः । मनः संकल्पादिसाधनमान्तरं ज्ञानेन्द्रियम् । मन्तव्यं-तद्विषयः संकल्पादिः । बुद्धिः निश्चयात्मवृत्तिविशिष्टमन्तःकरणम् । बोद्धव्यं तदीयो विषयो यो निश्चेतव्यो भवति । अहंकारोऽभिमानात्मकवृत्तिमदन्तःकरणम् । अहं

एष द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुषः स परेऽक्षर आत्मनि सम्प्रतिष्ठते ॥९॥

परमेवाक्षरं प्रतिपद्यते स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वो भवति तदेष श्लोकः ॥१०॥

कर्तव्यं तदीयो विषयो याऽभिमन्येत । चित्तं स्मरणात्मकवृत्तिमदन्तःकरणम् । चेतयितव्यं चित्तेन स्मरणीयं वस्तु तद्विषयभूतम् । तेजः शरीरान्तर्गतस्तेजोधातुर्यः शरीरगतोष्णतयाऽनुमीयते । विद्योतयितव्यं शरीरगतेन तेजसा प्रकाश्यं शरीरान्तर्गतं वस्तु । प्राणः प्राणवायुः । विधारयितव्यं प्राणेन वायुना धारणीयमिदं शरीरं कार्यकरणसंघातरूपम् । अचेतनाः कार्यकरणरूपाः सर्वेऽपि पदार्थाः परमात्मनि प्रतिष्ठिताः सन्तीत्येतेन मंत्रेण प्रपञ्चय प्रदर्शितः ॥८॥

संप्रति चेतनस्य जीवात्मनोऽपि परब्रह्मणि प्रतिष्ठितत्वोक्त्या पूर्वोक्तसर्वशब्दार्थप्रपञ्चनमवशिष्टं पूरयति-एष हि प्रसिद्धोऽयं सर्वेषां नः स्वरूपमात्मा यो द्रष्टा, चाक्षुषज्ञानवान् । स्प्रष्टा त्वगिन्द्रियजन्यप्रत्यक्षाश्रयः । श्रोता श्रावणप्रत्यक्षकर्ता । घ्राता घ्राणजन्यगन्धाद्यनुभवी । रसयिता रसनेन्द्रियजन्यरसादिविषयकज्ञानवान् । मन्ता मनोरूपान्तरेन्द्रियजन्यसंकल्पाद्याश्रयः । बोद्धा निश्चयकर्ता । कर्ता कर्तृत्वधर्मवान् । विज्ञानात्मा विज्ञानमात्मा स्वरूपमस्य विज्ञानरूपः पुरुषो जीवात्मा स प्रसिद्धो जीवोऽपि परे सर्वतः समुत्कृष्टे अक्षरे क्षरणशून्येऽविनाशिनि आत्मनि परब्रह्मणि संप्रतिष्ठते प्रतिष्ठितो वर्तते । अनेन जीवात्मनोऽपि परमात्मनि प्रतिष्ठितत्वमुक्त्वा सर्वशब्दार्थः साकल्येन प्रपञ्चितः ॥९॥

सर्वप्रतिष्ठाधारस्य परमात्मन एव रूपताज्ञानस्य फलमधुना वदति परमिति । तत् पूर्वोक्तम्–अच्छायम् छाया कामकर्मात्मिका माया तया रहितम् । प्रकृत्यनधीनमित्येतत् । अत एवाशरीरं प्राकृतशरीरशून्यम् । अलोहितं लोहितादिरूपशून्यम् । शुभ्रम् स्वप्रकाशं दोषगन्धरहितं वा । अक्षरं क्षरणविवर्जि-

विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि सम्प्रतिष्ठन्ति यत्र । तदक्षरं वेदयते यस्तु सोम्य ! स सर्वज्ञः सर्वमेवाविवेश ॥११॥

इति प्रश्नोपनिषदि चतुर्थः प्रश्नः ॥४॥

समविनाशीत्येतत् । परमात्मानं वेदयते समुपास्ते । सोऽधिकारी परमेवाक्षरं परब्रह्मैव प्रतिपद्यते प्राप्नोति । हे सोम्य प्रियदर्शन यस्तु परमक्षरं प्रतिपद्यते स सर्वज्ञो भवति न हि तादृशं वस्तु यत्तेन ज्ञातं न भवति । सर्वो भवति । अवाप्तसमस्तकामो भवति । तदक्षरं ब्रह्माधिकृत्यैषा वक्ष्यमाणः श्लोको मंत्रो भवति । वक्ष्यमाणो मंत्रोऽक्षरब्रह्मणः सर्वाधारत्वं तद्वेदिनः तत्प्राप्तिं सर्वज्ञत्वं सर्वकामत्वं च संगृह्य प्रतिपादयतीत्यर्थः ॥१०॥

विज्ञानात्मा विज्ञानस्वरूपो जीवः सर्वैः चक्षुरादिभिर्देवैरिन्द्रियैरमुख्यप्राणभुतैः सह यत्र संप्रतिष्ठति, तथा प्राणाः मुख्यप्राणाः प्राणापानादयो भुतानि सूक्ष्मस्थूलानि यत्र परमात्मनि संप्रतिष्ठन्ति पूर्वोरीत्या प्रतिष्ठितानि सन्ति तत् स्वप्रकाशमक्षरं क्षरणरहितं परब्रह्म वेदयते जानाति उपास्त इत्येतत् । यस्तु अधिकारी, हे सोम्य स सर्वज्ञः सन् सर्वमेवाविशति । सर्वानपि कामानवाप्नोति । "कामान्नी कामरूप्यनुसंचरन्" सर्वेषु लोकेषु कामचारी भवति । इत्यादिश्रुत्यनुसारेण यद्यत्कामयते तेन तेन रूपेण सर्वलोकसंचरणकर्ता भवतीत्यर्थः । अत्र विज्ञानात्मेतिपदेन विज्ञानरूपता, एष हि द्रष्टेत्यनेन पूर्वमंत्रोक्तेन विज्ञातृरूपता च जीवस्य प्रतिपादिता भवति । अतः केवलविज्ञानरूपतावादिनः केवलविज्ञातृरूपतावादिनश्च मतमपाकृतं भवति ॥११॥

इति भगवद्रामानन्दाचार्यविरचिते प्रश्नोपनिषद आनन्दभाष्ये चतुर्थः प्रश्नः ॥४॥

समरीनिर्महातेजाः परब्रह्म सनातनः।
जयताऽऽज्ञानभीनाशो वेदवेद्यो महामतिः॥
ankurnagpal108@gmail.com

अथ पञ्चमः प्रश्नः

अथ हैनं शैब्यः सत्यकामः प्रपच्छ। स यो ह वैतद्भगवन्मनुष्येषु प्रायणान्तमोंकारमभिध्यायीत कतमं वाव स तेन लोकं जयतीति ॥१॥

तस्मै स होवाच एतद्वै सत्यकामः परं चापरं च ब्रह्म यदोंकारः। तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेति ॥२॥

स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसम्पद्यते। तमृचो मनुष्यलोकमुपनयन्ते स तत्र

अथ सौर्यायणीप्रश्नानन्तरम्, शैब्यः शिबेरपत्यं पुमान् सत्यकामः सत्यकामनामा शैब्यः पप्रच्छ पृष्टवान्। स यः कोऽप्युपासको जीवो मनुष्येषु मध्ये हे भगवन् पूजार्ह पिप्पलाद! प्रायणान्तं प्रकर्षेण अयनं प्रायणं मरणं तदन्तो यस्याभिध्यानस्य तत्प्रायणान्तम्। क्रियाविशेषणत्वान्नपुंसकत्वमेकवचनं च बोध्यम्। यावज्जीवमित्यर्थः। ओङ्कारमोमित्येतदक्षरमभिध्यायीताभितश्चिन्तयेत्। ओङ्कारार्थपरमपुरुषमोङ्काराऽऽलम्बनेन चिन्तयतीत्यर्थः। स ओङ्काराभिध्यायी तेन ओङ्कारेणालम्बनेन ध्यानेन कतमं ज्ञानकर्मभ्यां जेतव्येषु लोकेषु कं लोकं जयति प्राप्नोतीति। स पिप्पलाद एवं पृष्टवते सत्यकामायोवाचोक्तवान्। अत्र मंत्रे हवा इत्यव्ययं प्रसिद्धिद्योतकम्। वावशब्दस्तु निश्चयावबोधकः ॥१॥

हे सत्यकाम यत् योऽयमोङ्कार एतदेव परमपरं च ब्रह्मोभयविधब्रह्मवाचकत्वादोंकारः परमपरं च ब्रह्मेतिसामानाधिकरण्यनिर्देशः। परं ब्रह्म पूर्वप्रश्नोक्तमक्षरपदवाच्यम्। अपरं ब्रह्म हिरण्यगर्भरूपम्। उभयविधस्यापि ब्रह्मणोऽभिध्यान आलम्बनमोंकारः। तस्माद् हेतोः विद्वानोङ्करास्य पराऽपरब्रह्मध्यानाऽलम्बनत्वज्ञानी उपासक एतेनैव ओङ्काररूपेणैव आयतनेन आलम्बनेन प्रतीकेनेतियावत्। एकतरं परमपरं वा ब्रह्म अन्वेति अनुगच्छति उपास्त इत्येतत् ॥२॥

प्रथममपरब्रह्मोपासनफलं प्रदर्शयति—स उपासक एकमात्रमेका मात्रा यस्य तादृशं ह्रस्वमोङ्कारमपरब्रह्मवाचकमभिध्यायीताभिध्यायति। उपास्त

तपसा ब्रह्मचर्येण श्रद्धया सम्पन्नो महिमानमनुभवति ॥३॥

अथ यदि द्विमात्रेण मनसि सम्पद्यते सोऽन्तरिक्षं यजुर्भिरुन्नीयते सोमलोकम् । स सोमलोके विभूतिमनुभूय पुनरावर्त्तते ॥४॥

यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परमपुरुषमभि-

इत्येतत्। एकमात्रविभागो यदि ह्रस्वमेव प्रणवमालम्ब्यापरं ब्रह्मोपास्ते इति भावः। स उपासकः तेनैव एकमात्रणोङ्कारेण संवेदितः संवेदनं विज्ञानं प्रापितः। अपरब्रह्मसाक्षात्कारमापादित इत्येतत्। तूर्णं शीघ्रमेव जगत्यां भुवि अभिसंपद्यते प्राप्नोति। किमभिसम्पद्यत इत्यत्राह—तं ह्रस्वप्रणवोपासकम्। ऋच ऋग्वेदमंत्रा मनुष्यलोकं मानुषं शरीरम्। उपनयन्ते प्रापयन्ति। स पृथिव्यां जायमानो ह्रस्वप्रणवोपासनवशान्न पश्वादिशरीरं प्राप्नोति किन्तु मनुष्यशरीरमेवेत्यर्थः। स उपासकः तत्र मनुष्यशरीरे तपसा चान्द्रायणादिना। ब्रह्मचर्येणाष्टविधमैथुनविवर्जनेन। श्रद्धया आस्तिक्यबुद्ध्या। सम्पन्नः युक्तः सन् महिमानं मानुषीं श्रेष्ठां विभूतिमनुभवति। मनुष्यशरीरोऽपि जीवः तपःप्रभृतिविवर्जितो दुर्गतिमनुभवन् दृश्यते पृथिव्याम्। अयं तु तथा न भवति। सोऽयमोङ्कारमेकमात्रमालम्ब्यापरब्रह्मोपासनप्रभाव इति भावः ॥३॥

अथशब्दः फलान्तरकथनोपक्रमे। फलान्तरमभिधत्त इत्यर्थः। यदि द्विमात्रेण दीर्घेण प्रणवेन अपरब्रह्मवाचकेनालम्बनेन मनसि सम्पद्यत अपरं ब्रह्म मनसि ध्यायति तदा स उपासको यजुर्भिर्यजुर्मन्त्रैरन्तरिक्षमन्तरिक्षगतं सोमलोकं चन्द्रलोकमुन्नीयते प्राप्यते। उपलक्षणमेतदूर्ध्वलोकानां हिरण्यगर्भलोकपर्यन्तानामितरेषामपि। स द्विमात्रोङ्काराभिध्यायी सोमलोके तदुपलक्षिते लोकान्तरे वा विभूतिभूततत्तल्लोकोचितमैश्वर्यमनुभूय भुक्त्वा पुनरावर्तते मनुष्यलोकं प्रति पुनरागच्छति पुण्यक्षये सति अपरब्रह्मोपासकानां पुनरावृत्तिभावात्। क्षीणे पुण्ये मर्त्यलोकं विशन्तीति श्रुतेः ॥४॥

य उपासकः। पुनरेतं परमपुरुषं परमात्मानं श्रीरामं त्रिमात्रेण प्लुतो-

ध्यायीत स तेजसि सूर्ये सम्पन्नः। यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते तदेतौ श्लोकौ भवतः ॥५॥

च्चारणेन त्रिमात्रस्य प्लुतत्वप्रसिद्धेः । ओमित्यनेनैवाक्षरेण ओङ्कारेणैवालम्बनभूतेनाभिध्यायीताभिमुख्येन चिन्तयति । उपास्त इत्येतत् । स त्रिमात्रोंकारालम्बनेन परमपुरुषध्यानकर्ता तेजसि तेजोमण्डलाकारे सूर्ये आदित्ये सम्पन्नः संगतः । तत्र गत इत्येतत् । पादोदरः पादः पादेन्द्रियं गमनसाधनमुदर उदरप्रदशे यस्य स पादोदरः सर्पः । स यथा त्वचा जीर्णया त्वचा कञ्चुकेनेत्यर्थः । विनिर्मुक्तो भवति । स्थानविशेषसंश्लेषं प्राप्य सर्पः कञ्चुकं विमुञ्चतीत्यर्थः । हवै शब्दौ कञ्चुकविमोकस्य सर्पकृतस्य प्रसिद्धिं बोधयतः । एवं सर्पकञ्चुकविमोकदृष्टान्तेन पाप्मना मुक्तिप्रतिबन्धकेन पुण्यपापस्वरूपेण कर्मणा । विनिर्मुक्तो विरहितो भवतीति शेषः । सर्पः इवोपासकोऽपि सूर्यमण्डलरूपस्थानविशेषसम्बन्धमेत्य पाप्मना विनिर्मुक्तो भवतीति भावः । स पाप्मना विनिर्मुक्त उपासकः सामभिः साममन्त्रैर्गायनप्रधानैर्ब्रह्मलोकं ब्रह्मणः परमात्मनः श्रीरामस्य लोकः तं ब्रह्मलोकं भगवद्धाम साकेताभिधानम् । उन्नीयत ऊर्ध्वं प्राप्यते । स ब्रह्मलोकं प्राप्त उपासकः । तत्र ब्रह्मलोके एतस्माद् दृश्यमानाज्जीवघनात् । मूर्तौ घनशब्दस्यानुशासिततत्वाद् मूर्तिर्घनः स च जीवसम्बन्धितया जीवघनः क्षरः पुरुषः तस्माज्जीवघनात् क्षरपुरुषादपि परात् श्रेष्ठभूताज्जीवादक्षरात् परं श्रेष्ठतमं पुरिशयं पूः शरीरं प्राणिमात्रस्य, तत्र पुरि शेत इति पुरिशयः तम् सर्वप्राणिहृदयगुहायामन्तर्यामितया विद्यमानं पुरुषं मुख्यतया पुरुषशब्दाभिधेयं पुरुषसूक्तादिप्रसिद्धं भगवन्तं पुरुषोत्तमं श्रीरामचन्द्रमीक्षते पश्यति । द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः । इति भगवतद्गीतामिहोपबृहणं ज्ञेयम् । तत् प्रणवायतनं ध्यानमधिकृत्य एतौ वक्ष्यमाणौ श्लोकौ मंत्रौ भवतः प्रवृत्तौ स्तः ॥५॥

Scanned by CamScanner

तिस्रो मात्रा मृत्युमत्यः प्रयुक्ता अन्योन्यसक्ता अनविप्रयुक्ता। क्रियासु बाह्याभ्यन्तरमध्यमासु। सम्यक्प्रयुक्तासु न कम्पते ज्ञः ॥६॥

ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत्तत्कवयो वेदयन्ते। तमोङ्कारेणैवायतनेनान्वेति विद्वान्यत्तच्छान्तमजरममृतमभयं परं चेति ॥ ७ ॥

इत्यथर्ववेदीयप्रश्नोपनिषदि पञ्चमः प्रश्नः ॥५॥

—:०:—

तिस्रः त्रित्वसङ्ख्याकाः प्रणवस्य मात्रा मृत्युमत्यो मृत्युर्विद्यते कार्यं यासां ता मृत्युमत्यो मृत्युप्रदा अनर्थफलदायिका भवन्ति। कदा कस्येत्याकाङ्क्षायामाह—अन्योन्यसक्ता अनविप्रयुताः प्रयुक्ता अन्योन्यं परस्परं शीघ्रगत्योच्चारणेन सक्ता अतिश्लिष्टाः। विशेषेण कालविशेषक्षेपेण प्रयुक्ता विप्रयुक्ता न विप्रयुक्ता अविप्रयुक्ता तथा न भवन्तीत्यविप्रयुक्ता मन्दगत्योच्चारणेनातिविश्लिष्टवर्णतया समुच्चारिताः। एवंभूता यदि प्रयुक्ता उच्चरिता भवन्ति तदा तस्य प्रणवोच्चारणरहस्यज्ञानविधुरस्य प्रयोक्तुरनर्थावहा भवन्तीति भावः। आसु तिसृषु मात्रासु बाह्यान्तरमध्यमासु क्रियासु बहिर्भवा बाह्याः क्रिया यज्ञहोमादिकाः कायसम्बन्धिन्यः क्रियाः। अन्तरे मनसि भवा आन्तरा मानसजपध्यानादिरूपाः। मध्यमा कायमनसोरन्तरालवर्तिन्यो वाचिक्यो जपादिरूपाः। तासु क्रियासु सम्यक् प्रयुक्तासु अत्यन्तसंश्लेषविश्लेषवर्जनपुरस्सरमुच्चारितासु। ज्ञस्तादृशप्रणवोच्चारणरहस्यवेदी जनो न कम्पते फलतश्च्युतो न भवति। तिसृणां मात्राणां सम्यक्प्रयोगे फललाभोऽसम्यक्प्रयोगे तु महाननर्थ इति भावः ॥६॥

ऋग्भिः ऋङ्मन्त्रैरेतं मनुष्यलोकम्। यजुर्भिर्यजुर्मन्त्रैरन्तरिक्षलोकम्। चतुर्मुखलोकपर्यन्तमन्तरिक्षोपलक्षितं लोकमित्यर्थः। कवयः क्रान्तदर्शिनः सूरयो यत् तद् वेदयन्ते पश्यन्ति विष्णोः परमपदरूपं लोकम्। साकेता–

अथ षष्ठः प्रश्नः ।

अथ हैनं सुकेशा भारद्वाजः पप्रच्छ । भगवन्हिरण्यनाभः कौशल्यो राजपुत्रो मामुपेत्यैतं प्रश्नमपृच्छत् । षोडशकलं भारद्वाज पुरुषं वेत्थ तमहं कुमारमब्रुवं नाह-

ख्यमिति यावत् । तं लोकं च विद्वान् एतेनैवैकमात्रद्विमात्रत्रिमात्ररूपेणोङ्कारेणायतनेनालम्बनेन अन्वेत्यनुगच्छति । ततश्च शान्तं षड्र्मिविवर्जितम् । अजरं जराभयविनिर्मुक्तम् । अमृतं मरणसम्पर्कशून्यम् । अभयं सर्वविधभयरहितम् । परमुत्कृष्टम् । सर्वतः श्रेष्ठमिति यावत् । यत् परं ब्रह्म तदप्यन्वेति । प्राप्नोतीत्यर्थः । त्रिमात्रप्रणवायतनरूपपरमपुरुषं ध्यात्वा साकेताख्यं भगवद्धाम गत्वा तत्र शान्तत्वादिविशेषणविशिष्टं श्रीरामाख्यं परं ब्रह्म प्राप्तो भवतीति भावः ॥

इति भगवद्रामानन्दचार्यविरचिते प्रश्नोपनिषद आनन्दभाष्ये पंचमः प्रश्नः ॥५॥

--: ० :--

अथ सत्यकामप्रश्नानन्तरं सुकेशा नामतो भारद्वाजो भरद्वाजगोत्रोत्पन्नः शिष्य एतं पिप्पलादं पप्रच्छ पृष्टवान् । ह प्रसिद्धमेतत् । निश्चितं वेत्यर्थः । भगवन् पूजार्ह पिप्पलाद हिरण्यनाभो हिरण्यनाभनामा कौशल्यः कोशलदेशोद्भवः कोशलायाः पुत्रो वा राजपुत्रो राज्ञः पुत्रो जात्या-क्षत्रिय इत्यर्थः । मामुपेत्य मत्समोपमागत्यैवं वक्ष्यमाणं प्रश्नपपृच्छत् पृष्टवान् । प्रश्नाकारमाह—हेभारद्वाज षोडशकलं षोडशसंख्याकाः कला यत्र तादृशम् । कलाः प्राणाद्या वक्ष्यमाणा ज्ञेयाः । पुरुषं वेत्थं जानासि किम्? तं षोडशकलपुरुषपृच्छाकर्त्तारं हिरण्यनाभं कुमारं राजपुत्रमहमब्रुवं प्रोक्तवान् । किमित्याह—अहं सुकेशा इमं षोडशकलं पुरुषं न वेद न जानामि । यदि अहमिमं पुरुषमवेदिषम् जानीयाम् तर्हि ते तुभ्यं श्रद्धावते जिज्ञासवे राजकुमाराय शिष्याय योग्याय कथं केन हेतुना नावक्ष्यम् न ब्रूयामिति । एतावत्कथनेऽपि तमनृतत्वशङ्कयाऽविश्वस्तमिव ज्ञात्वा विश्वासोत्पादनाय पुनरुक्तवान् । समूलो मूलेन सहित एष परिशुष्यति सवासनपुण्यप्रणाशेन लोकद्वयपरिभ्रष्टो भवति योऽनृतमसत्यमभिवदति ज्ञातमप्यर्थं योग्याय

मिमं वेद यद्यहमिममवेदिषं कथं ते नावक्ष्यमिति । समूलो ह वा एष परिशुष्यति योऽनृतमभिवदति तस्मान्नार्हाम्यनृतं वक्तुं स तुष्णीं रथमारुह्य प्रवव्राज तं त्वा पृच्छामि क्वासौ पुरुष इति ॥ १ ॥

तस्मै स होवाच । इहैवान्तःशरीरे सोम्य स पुरुष-स्मिन्नेताः षोडशकलाः प्रभवन्तीति ॥२ ॥

स ईक्षांचक्रे । कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति ॥ ३ ॥

शिष्याय न ब्रूते । अपलपतीत्यर्थः । तस्मादनृतवदने समूलप्रणाशरूपदोष-दर्शित्वादहं सुकेशाऽनृतमसत्यं वक्तुं कथयितुं नार्हामि न शक्नोमि । स हिरण्यनाभो मयैवं प्रत्याख्यातः सन् तूष्णीं लज्जया किञ्चिदनुक्त्वैव रथ-मारुह्य प्रवव्राज प्रकर्षेण गतवान् । यथागतं देशमित्यर्थः । एतेन कस्यामप्य-वस्थायां विधिवदुपगताय योग्यशिष्याय विद्योपदेश्यैव नापलपनीयेति सूचितम् । तं षोडशकलं पुरुषं मयाऽपि विज्ञेयतया हृदये कृतं त्वा त्वां पूजार्हं योग्यतमं गुरुं पृच्छामि । क्वासौ पुरुषोऽसौ षोडशकलः पुरुषः कुत्र प्रदेशे तिष्ठतीति ॥१॥

तस्मै सुकेशानाम्ने शिष्याय स पिप्पलाद उवाच उक्तवान् । हे सोम्य प्रियदर्शन स त्वया पृष्टः पुरुष इहैवास्मिन्नेव दृश्यमाने शरीरे देहे वर्तत इति शेषः । यस्मिन् पुरुषे यत्पुरुषनिमित्तमित्यर्थः । वक्ष्यमाणाः प्राणाद्याः कलाः प्रभवन्ति उत्पद्यन्ते यद्वा प्रभवन्ति । यस्योपभोगकरण-समर्था भवन्तीत्यर्थः ॥२॥

सः षोडशकलाप्रयुक्तभोगवत्तया षोडशकलः पुरुषः । जीव इति यावत् । ईक्षाञ्चक्रे पर्यालोचितवान् । किमित्याह कस्मिन्नुत्क्रान्ते शरीरतो बहिर्निर्गतेऽहमुत्क्रान्तः शरीरान्निर्गतो भविष्यामि । कस्मिंश्च प्रतिष्ठिते शरीरे स्थितिं लभमानेऽहं प्रतिष्ठास्यामि प्रतिष्ठितो भविष्यामीति । मदुत्क्रमणसहभूतोत्क्रमणवान् कः ? मत्प्रतिष्ठानसहभूतप्रतिष्ठानवांश्च क इति पर्यालोचनं कृतवानित्यर्थः ॥३॥

Scanned by CamScanner

स प्राणमसृजत । प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथवीन्द्रियं मनः । अन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु नाम च ॥ ४॥

स यथेमा नद्यः स्यन्दमाना समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते तासां नामरूपे समुद्र इत्येवं प्रोच्यते ।

स पूर्वोक्तप्रकारकपर्यालोचनकर्ता जीवः प्रथमतः प्राणं मुख्यप्राणं प्राणापानादिप्रभेदपञ्चकविशिष्टमसृजत सृष्टवान् । जीवस्येदं प्राणादिसर्जनं स्वभोगकारणादृष्टद्वारैव न साक्षादिति ध्येयम् । प्राणात् प्राणस्यानन्तरं श्रद्धामदृष्टजनककर्मस्वास्तिक्यबुद्धिमसृजतेत्यन्वयः । ततः खमाकाशं शब्दमात्रगुणकं भूतज्येष्ठं सृष्टवान् । ततो वायुः शब्दस्पर्शगुणद्वयकं वायुं सृष्टवान् । छान्दसो विभक्तिव्यत्ययो वायुरिति । एवमापः पृथिवीत्यादिष्वपि बोध्यम् । ततो ज्योतिः तेजो धातुं शब्दस्पर्शरूपगुणकं व्यसृजत् । तत आपः शब्दस्पर्शरूपरसगुणकं जलं सृष्टवान् । ततः पृथिवी पूर्वोक्तचतुर्भिर्गुणैः सह गन्धरूपः पञ्चमो गुणो यस्य तादृशं पञ्चगुणं पृथिवीधातुमसृजत् । तत इन्द्रियं ज्ञानेन्द्रियं कर्मेन्द्रियञ्च सृष्टवान् । ततो मनोऽन्तरिन्द्रियं सृष्टवान् । एवं कार्यकरणसृष्ट्यनन्तरं तदीयस्थिरताया अन्नाधीनतया व्रीहियवादिरूपमन्नम् । ततोऽन्नाद् भक्ष्यमाणाद् वीर्यं सामर्थ्यं शरीरेन्द्रियादीनां कर्मसु प्रवृत्यर्थं सृष्टवान् । ततः शरीरादीनां विशुद्धिकरणं तपश्चान्द्रायणादिकम् । ततो मन्त्राः ऋगादिमन्त्रान् ततः कर्म ज्योतिष्टोमादिका वैदिकीः स्मार्त्ताश्च क्रियाः ततो लोका ज्योतिष्टोमादिकर्मभिः प्राप्यान् स्वर्गादीन् लोकान् । लोकेषु स्वर्गादिषु नाम स्वर्गादिनामधेयानि च सृष्टवान् । अदृष्टद्वारा प्राणादिषोडशकलास्रष्टृत्वेन तत्प्रयुक्तभोगवत्वेन जीवस्य षोडशकलत्वमिति भावः ॥४॥

संप्रति परमात्मनोऽकलत्वं दर्शयति सदृष्टान्तं स यथेति । परमपुरुषस्याकलत्वे यो दृष्टान्तः प्रसिद्धः स दृष्टान्त इत्यर्थः । दृष्टान्तमाह—यथा-लोके स्यन्दमानाः प्रवहन्त्य इमा दृश्यमाना नद्यो गङ्गायमुनादयः समुद्रायणाः समुद्रा एवायनं गतिराधारः प्राप्यस्थानं वा यासां ताः समुद्रं सागरं प्राप्य मिलित्वा अस्तं गच्छन्ति पृथग्भावेन दर्शनं यथा तासां न

एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति । भिद्येते चासां नामरूपे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवति तदेष श्लोकः ॥५॥

भवति तथा लुप्ता भवन्ति । अदर्शने हेतुमाह—तासां नदीनां नामरूपे नाम गङ्गायमुनादिकं रूपं च शुक्लकृष्णादिकं ते भिद्येते विनश्यत इत्यर्थः । समुद्रप्रवेशानन्तरं गङ्गादिनामानि रूपाणि च शुक्लादीनि तासां न भवन्तीति भावः । समुद्र इत्येवं प्रोच्यते गङ्गायमुनादिरूपवस्तुसत्त्वेऽपि समुद्राऽपृथक्स्थिततया विवेकासंभवात् समुद्र इति व्यवहारास्पदत्वं प्राप्नुवन्ति । अतः समुद्र इत्येव व्यवह्रियत इति भावः । एवमेव नदीदृष्टान्तेनैव परिद्रष्टुर्मोक्तुः परमपुरुषसाक्षात्कारवतो वा जीवस्य इमा प्राणादयः पूर्वोक्ताः षोडशापि भोगोपकरणभूताः कलाः । पुरुषायणाः पुरुषः परमपुरुषः एव अयनं गतिराधारो यासां तादृशाः परमपुरुषाधीनस्वरूपस्थितिप्रवृत्तयोऽत एव पुरुषं भगवन्तं श्रीरामं प्राप्यास्तं गच्छन्ति । भोगसामर्थ्यविहीनतया विलुप्ता इव भवन्ति अदर्शनं यान्तीति यावत् । तासां कलानां नामरूपे नाम च रूपं च ते । प्राणादिकानि नामानि यथास्वं प्राणादीनां स्वरूपाणि च भिद्येते विनश्यतोऽत एव पुरुष इत्येवं प्रोच्यते । पुरुषाऽपृथक्स्वरूपस्थितिप्रवृत्तिकतया पुरुषशब्देनैव व्यवहारो भवति न प्राणादीनां प्राक्तननामरूपैरिति भावः । अत एव परमात्मा अकलः कलारहित इत्युच्यते । अमृतो मरणधर्मरहितश्चोच्यते । प्राणादिकलासम्बन्धाधीनत्वान्मरणजन्मादिव्यवहारस्येति भावः । तदेष श्लोकः तदकलत्वामृतत्वादिविशिष्टं परं ब्रह्माधिकृत्य एष वक्ष्यमाणः श्लोको मन्त्रः प्रवृत्त इत्यर्थः ॥५॥

अरा इव रथनाभौ कला यस्मिन्प्रतिष्ठिताः । तं वेद्यं

रथनाभौ रथसम्बन्धिचक्रस्य मध्यभागे नाभिरिव स्थितः स्थूलः परितश्छिद्रनिचितः काष्ठविशेषो रथनाभिः । तत्र अरा नाभिनेम्यन्तरालवर्तिनः क्षुद्राः काष्ठविशेषा यथा प्रतिष्ठिताः प्रोता भवन्ति तथैव यत्र परमपुरुषे कलाः प्राणादयः प्रतिष्ठिताः । प्राणादीनामुपादानं तु वस्तुतः परमपुरुष एव स्रष्टाऽपि मुख्यः स एव । जीवस्य तु भोगाधायकत्वेन सम्बन्धि-

Scanned by CamScanner

पुरुषं वेद यथा मा वो मृत्युः परिव्यथा इति ॥ ६ ॥

तान्होवाचैतावदेवाहं परं ब्रह्म वेद । नातः परमस्तीति ॥ ७ ॥

ते तमर्चयन्तस्त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि । नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥८ ॥

इत्यथर्ववेदीयप्रश्नोपनिषदि षष्ठः प्रश्नः ॥६॥

—०—

त्वाददृष्टद्वारा सर्जकत्वाच्च षोडशकलत्वमतः कला अपि परमपुरुषोपादानकतया तत्रैव प्रतिष्ठिता भवन्ति । तत्रैव संश्लेषविशेषप्राप्तौ सत्यां लयवन्तोऽपि भवन्ति अतः कलानां तत्र प्रतिष्ठितत्वमुच्यते । तं सर्वासां कलानामात्मभूतं वेद्यं मुमुक्षुभिः परिज्ञेयं पुरुषं निरुपाधिकपुरुषशब्दाभिलप्यं वेत्थ विजानीयाः । एवं रीत्या विजानतां फलमाह — हे शिष्याः व एवं प्रकारेण परमपुरुषज्ञानवतो युष्मान् मृत्युः संसाररूपो मा परिव्यथा न परितो व्यथयतु । मृत्युप्रयुक्ता व्यथा भवतां परमात्मतत्त्ववेदिनां न भवतु इति भावः ॥६॥

एवं तान् शिष्यान् सुकेशादीनुपदिश्य उवाच प्रोक्तवान् भगवान् पिप्पलादो गुरुः । किमित्याह—एतत्परं ब्रह्माधिकृत्याहं पिप्पलाद एतावदेव वेद जानामि ह निश्चितमेतत् । अहमेतावदेव जानामीत्युक्तौ कदाचिदिताऽप्यधिकं वेदितव्यं भवेदिति शंका संभवेदतः तन्निराकर्त्तुमाह नातः परमस्तीति अतोऽस्माद् विज्ञातात् परब्रह्मणः परमुत्कृष्टं वेदितव्यं नास्तीति ॥७॥

ते सुकेशादयः षडपि शिष्यास्तं गुरुं पिप्पलादम् । अर्चयन्तः पूजयन्तो गुरुचरणकमलयोः पुष्पाञ्जलिप्रक्षेपेण शिरःप्रणिपातादिना सेवमाना इत्येतत् । ऊचुरिति शेषः । किमूचुरित्यत्राह—त्वं हि त्वमेव नोऽस्माकं शिष्याणां पिता । जन्मदो बीजप्रदः पिता शरीरमात्रं ददाति तच्च जरामरणादिनानाविधदुःखपरिभुतं त्वं तु जन्ममरणाद्यन्तकरं विज्ञानजन्म

Scanned by CamScanner

दत्तवानसि । ततः शरीरप्रदपित्रपेक्षयाऽपि श्रेष्ठः पिताऽसीतिभावः । पितृत्वे हेतुमूचुः-विद्यायाः कामकर्मात्मिकाया मायायाः परं पारं तीरं तारयसि प्रापयसि । विद्ययाऽविद्यापारप्रापकत्वात् पितासीति भावः । नमः परमऋषिभ्यो ब्रह्मविद्यासम्प्रदायप्रवर्तकेभ्यः तत्त्वप्रदेभ्यो नमो नमस्कारः । द्विरुक्तिरादरार्थोपनिषत्समाप्तिद्योतनार्था वा ॥८॥

इति भगवद्रामानन्दाचार्यविरचिते प्रश्नोपनिषद आनन्दभाष्ये षष्ठः प्रश्नः ॥६॥ समाप्ता चेयमथर्ववेदीया प्रश्नोपनिषद् ॥

--: ० :--

पण्डितसम्राट्स्वामिश्रीवैष्णवाचार्य-
वेदान्तपीठाचार्यकृतः

श्रीरामाब्जपञ्चकस्तवः

यद्रजश्चात्र संस्पृश्य शिला चेतनतां गता
राम ! ते तत् पदाब्जं स्यान्मन्मनोभृङ्गताकरम् ॥१॥

यच्छाया त्वत्प्रपन्नानां परमानन्ददायिनी ।
राम ! ते तत् कराब्जं स्यान्मन्मनोभृङ्गताकरम् ॥२॥

यत्रानन्ता दया तेऽस्ति संसारविषभेषजम् ।
राम ! ते तद् हृदब्जं स्यान्मन्मनोभृङ्गताकरम् ॥३॥

यद् विकासमवाप्नोति भक्तैश्वर्यविवस्वतः ।
राम ! ते तन्मुखाब्जं स्यान्मन्मनोभृङ्गताकरम् ॥४॥

यत्कटाक्षमवाप्यैव प्राप्यते परमं पदम् ।
राम ! ते तद् दृगब्जं स्यान्मन्मनोभृङ्गताकरम् ॥५॥

वैष्णवभाष्यकारश्रीवैष्णवाचार्यनिर्मितः ।
पठनात् सर्वदो भूयाद् रामाब्जपञ्चकस्तवः ॥६॥

ankurnagpal108@gmail.com

३–श्रीरामानन्दग्रन्थमालायास्तृतीयं पुष्पम् ।

भगवच्छ्रीरामानन्दाचार्यप्रणीतानन्दभाष्योपेता

ईशकेनकठप्रश्नमुण्डकमाण्डूक्य-तैत्तिरीयैतरेयोपनिषदः



संशोधकः–पण्डितसम्राट् स्वामी श्रीवैष्णवाचार्य
वेदान्तपीठाचार्य (अहमदाबाद)

गुरुपूर्णिमा सन् १९६९ ई. } श्रीरामानन्दाब्द ६७०
सर्वेऽधिकाराः स्वायत्तीकृताः
मूल्य ६/००

Scanned by CamScanner

प्रकाशक :-श्रीरामानन्दवेदान्तप्रचारकसमिति अहमदाबाद

प्रथमावृत्ति-१००० प्रति

मूल्य-६/००

प्राप्तिस्थान-१-श्रीरामानन्दवेदान्तप्रचारकसमितिकार्यालय
अहमदाबाद

२-श्रीमोतीलाल बनारसीदास
चौक-वाराणसी

સમ્રીતિર્મહાતેજા: પરબ્રહ્મ સનાતન:।
જયતાજ્જાનકીનાથો વેદવેદ્યો મહામતિ:॥

ankurnagpal108@gmail.com

मुद्रक :—वैद्यराज स्वामी श्रीत्रिभुवनदासजी शास्त्री
श्रीरामानन्दप्रिन्टिंगप्रेस
कांकरियारोड-अहमदाबाद-२२

Scanned by CamScanner